पिंगलार्थप्रकाशः

५४०

५१ पत्राणि

नं. ४४०६
[illegible]
॥ पिङ्गलार्थप्रकाशः ॥
[illegible]
[illegible]

८५ . . . काव्य छंद पिंगल [illegible] ८६
१६००

[illegible]

पुस्तकमिदं पाठकोपनामरा
चन्द्रशर्मणः पिंगलार्थप्रकाशः

॥श्रीगणेशाय नमः॥ आकर्णाकृष्टगंगाधरकठिनतरोद्दंडकोदंडभंगप्रोद्भूतात्यंततारोच्चल
चकितजगज्जीवसंत्रस्यमानं॥ वैदेहीदृग्विलासाऽसितकमललसत्स्रग्वृतं स्वेष्टदेवं तेजःपुं
जं तमाद्यं निजसकलमहाविघ्नशांत्यै स्मरामि॥१॥ पाथोराशेस्तरंगानिव दिवसपतेरंशुपुंजा
निवाधो लोकाद्दुघ्नद्भुजंगानिव जलदगणासारपातानिवोच्चैः मुंचंतं बाणसंघान्दशवदनसु
तं लीलया यं जेषीन्द्रूयाद्रामानुजातं मम सकलमहाऽभीष्टसिद्ध्यै मदस्मात्॥२॥ उद्दामोज्झंघिताऽ
ब्धिं दशवदनपुरोद्यानमानाऽभिघातप्रख्यातो दंडबाहुं हृयशिशिरतरच्छायविश्रांतलोकं॥
वैदेहीदुःखसुप्यद्रघुपतिहृदयांभोजमध्येंदिनार्कं किंचित्तेजस्तदेशपवनतनुसमुद्भूतम
न्तः स्मरामि॥३॥ प्रज्ञावज्ञातदेवाऽधिपगुरुचरणाच्छब्दविद्याप्रवीणादाप्तुर्वेदाब्धिपारंगत रा०म०
विमलमतेः कृस्म देवाभिधानात्॥ तातात्सम्यक्प्रमग्विलासकलगुणनिधेस्तस्य राजा प्रण १

म्यश्रीमद्रुं श्रीधराख्योरचयतिविद्यादंपिंगलार्थप्रकाशम्॥४॥तातोपदिष्टमार्गेणचरतः

स्खलनंनमे॥ अथास्तिचेत्तदाकार्यौबुधैःकरपरिग्रहः॥५॥प्राणप्रियात्मसंभृतविद्यापति

तनजनेः कृतेहृदयरामस्यटीकेयंरच्यतेमया॥६॥साशोधनीयाविद्भिर्दोषेपिगुणदृष्टिभिः

॥निर्मत्सरैर्महाभागैः परोपकृतिजन्मभिः॥७॥ प्राकृतेविशेषोभियुक्तैरभिहितः एॐअम

लपरउ। सऋारेपिह्रिस्यवेविवरणइ। कच्चतवग्गाणन्तोदहवसमपाउअणस्थितिः इति॥ए

कारॐकारअनुस्वारमकारलकाराणांपुरोवर्त्तिनोवर्णाः मकारस्यचपष्ठस्योद्वौवर्णौकुचतुव

र्गाणामन्त्याश्चएतेदशवर्णाः प्राकृतेनसन्ति इत्यर्थः॥ऐऔअः यवशषङञनएतेदशवर्णा

ः प्राकृतेनसन्ति इतियावत्॥ग्रंथकृद्ग्रंथारंभेस्वाभीष्टसिद्धयेछन्दःशास्त्रप्रवर्त्तकपिंगलना

गानुस्मरणरूपंमंगलमाचरति॥जोविविहमत्तेति॥जोविविहमत्तयाविविधमात्राभिः अत्र

पिंग॰गु॰टी॰ मात्राप्रदस्यमात्राप्रस्तारपरत्वाद्द्विविधमात्राप्रस्तारैरित्यर्थः। विविमलमइहेलं। विविमलम
२ तिहेलंवेः पक्षिणोगरुडस्यविमलावंचनस्मायास्वीयापिंगलीयामतिः बुद्धिस्तयाहेलावधी
रणावंचनायस्यांक्रियायांतद्यथास्यात्तथास्वबुध्यागरुडस्यवंचनेकृत्वेत्यर्थः साअरपारंपतो
। सागरपारंप्राप्तः यश्चपगमंभासतरंडो। प्रथमोभाषातरंडः प्रथमश्चाद्यंभाषाअवहट्ठभाषा
ययाभाषयाअयंग्रंथोरचितः साअवहट्ठभाषातस्याइत्यर्थः तरंडः तरिः यथाकश्चित्तरिंप्राप्य
पारंप्राप्नोतितथापिंगलप्रणीतंछंदः शास्त्रंप्राप्यावहट्ठभाषारचितैतत्ग्रंथपारंप्राप्नोतीति
भावः। सोपिंगलोराजाओजअइसः पिंगलोनागोजयतिसर्वोत्कर्षेणवर्त्तते। अत्रेयमाख्यायिका
ऽनुसंधेया। यथाकिलब्राह्मणवेषधारिणंपिंगलंनागोयमितिज्ञात्वागरुडस्तंव्यापादयितुमु एम॰
घतः ततोमांव्यापादयपरंतुवर्णमात्राप्रस्ताररूपाऽपूर्वाएकाविद्यामयाज्ञायतेतांगृहीत्वेति २

गरुडं कन्यापादयितुमुद्यत प्रत्युत्क्वातेन च कथयविद्यामित्युक्तः प्रस्तारं भ्रमौ विरचयन्समुद्रंप्रा
प्यतन्मध्ये प्रविश्य गरुडं वंचितवानिति ॥ १ ॥ प्रस्तारस्य गुरुलघुज्ञानाऽधीनत्वात्तल्लक्षणमाह ।
दीर्घ इति दीर्घः आ ई ऊ ए ऐ ओ औ एते दीर्घाः संयुक्तपरो संयुक्तपरः संयुक्तं परस्परमिलितं अक्षरं
परो वर्ण्यो यस्मात् स इत्यर्थः बिंदुजुओ बिंदुः अनुस्वार विसर्गौ अं अः इत्येतौ ताभ्यां युतः यत्तु प्रा
कृते विसर्गाभावात् अत्र बिंदुपदेन अनुस्वार एवेति । तन्नानहीदं प्राकृतमात्रविषयं गुरुलघुल
क्षणमिति पाडिओ अ चरणंते पातितश्चरणांते । पादांतस्थितो लघुरपि विवक्षया गुरुर्ज्ञेय इत्य
र्थः अत एवोक्तं पादांतस्य विकल्पेनेति एवंभूतो वर्णः गुरुगुरुः गुरुसंज्ञक इति यावत् ज्ञेय इ
ति शेषः संसः गुरुः वंकवक्रः प्रस्तारादिषु पूर्वं प्रश्लिष्टाकारप्रश्लेषवत् अन्तजुस्वरूपो लेख
नीय इत्यर्थः ॥ ३ मत्तो द्विमात्रः ४ गुरोर्मात्राद्वयं ज्ञेयमित्यर्थः । अस्मो अन्यः आकारादि संयु

पिंग॰गु॰टी॰ त्तपरानुस्वारविसर्गसहिताक्षरभिन्न इत्यर्थः लङ्क। होइ लघुर्भवति लघुसंज्ञको ज्ञेयः सुद्ध
३ खा सुद्धः प्रस्तारादिषु ऋजुरेषाकारो लेखनीय इत्यर्थः एककलो एककलः एकाकृत्तामात्रा यस्मि
न्स ताहृशः लघोरेकामात्रा ॥ २॥ अथैतदुदाहरति माईइति माता यः रूएरूपेण दीणोहीनः
3 बहुओ वृद्धः अत एव जीर्णः शीर्णेन्द्रियांगः हेओ हेयः सागयोग्यः एवमपि देवः क्रीडाप्रसक्तः
तं शंभुं कामंती कामयमाना गौरी। गहिलत्तणं। वृथाग्रहं। कुणइ। करोति शंभो पार्वत्या ब्रियमा
णो विजयादीनां सखीनां परस्परसंलापवाक्यमेतत् अत्र दीर्घादीनि स्पष्टान्येव कुणइ इतीकार
स्वरेणान्ते पतितो गुरुर्ज्ञेयः तथा छंदः ॥ ३॥ अथ संयुक्तपरस्य वर्णस्य क्वचिद् गुरुत्वापवादमाह
। कत्थवि कुत्रापि रकारहकारसंयोगादन्यत्रापीत्यर्थः संयुक्तपरो वर्णो लघुर्भवति दर्शनेन लक्ष्यो एम॰
नुरोधेन जहा यथा उदाहीयते परिहसति चित्तधैर्यं तरुणीकटाक्षे निर्हृत्तं। अत्र ल्हइ इति संयु ३

क्तासैरेपरेपिरिइति इकारस्य लघुत्वमेव अन्यथामात्राधिक्यप्रसंगः गाथाछंदः ॥४॥ अथ बिंदु
युक्तस्य वर्णस्य एकारौकारयोः संयुक्त रकार हकार पूर्ववर्त्तिनश्च गुरुत्वापवादमाह इहि आरा इति
क्वचित विकल्पं। अत्रेऽषमपि लघुर्भवति॥ इकार हकारौ बिंदुयुतौ एकार ओकारौ तु शुद्धावपि हलर
हितावपि वर्णामिलिआ विवर्णामिलितावपि हलघुक्तावपीति यावत् लहू लघू। कस्य वीत्यत्र संयुक्त
परइत्युक्तं स च संयोगः रहाभ्यामेव वर्णांतरस्य यास्यो न त्वन्येनेत्याह रहेति। रहयोर्व्यंजनस्य च
संयोगे परे न तु रहयोरेव संयोगे परे इत्यर्थः। प्रेह्रे चेत एलघुरितिस्त्रोक्तप्र शब्दस्य सुंदरियाम्यज
मि नइ तिनारायणेति म्रियमाण उपेतिसुक्तिरित्यादेरसंग्रहापत्तेः व्यंजनपदस्य वैयर्थ्यापत्तेश्च
। अत्र रेफस्याधः स्थितस्य हकारस्य चोपरि स्थितस्य ग्रहणम्। संप्रदायात्। अत्र विंदुयुतयोरिका
रहकारयोरेओवर्णयोश्च प्राकृत एव लघुत्वं। संयोगे तु संस्कृतेपीत्यपि संप्रदायः। अन्ये तु रौद्रा



पिंग॰गु॰टी॰ येनमोनित्यायेइत्यादौ ओकारादेरपिलघुत्वदर्शनात् संस्कृतेतदपिनच ओकारस्यगुरुत्वेपिनदो
४ षइतिवाच्यं। पंचमंलघुसर्वत्रेत्युक्तिविरोधादित्याहुः केचित्तुनरहयोरेवा व्यंजनांतरेणसंयोगेपरे
लघुप्रतिपादकमिदं किंतुसंयोगमात्रे। कस्थवीत्यत्र विशेषानभिधानात्। रहव्यंजनेत्यत्र रहयोरुपा
५ दानंतुरहसंयोगेपरेलघुत्वस्यनित्यतयाप्रतिपादनाय। गोबलीवर्दन्यायेनवा। उदाहरणंतुनरह
मात्रविषयत्वान्निर्णयति। अशोकवनिकान्यायात्। अतएव रेवत्युत्तरमल्लज्येष्ठतुरगोपेंद्रानला
कैषुचेत्युपपन्नमित्याहुः तदनादरं। असेतसंविः अशेषमपिकस्थवीत्याद्युक्तंसर्वमपिसविहासंस
विभाषंविकल्पेन। केचित्तुपरेइतिपदंपदांतेइतिव्याख्यायकस्थवीतिचानुवर्त्यकृत्वापिपदांतेअ
शेषमपिसविभाषंगुरोर्लघुत्वं। लघोर्गुरुत्वमिवभवति। अतएव आंतरमपितबहिरिवव्यंजयि राम॰
तुंरसमशेषतः सततम्। असतीसत्कविसूक्तिः काचघटीचत्रयंपवेदेत्यत्रवस्यलघुत्वम्। नचात्र ४

अ लघुजिह्वयापागत्संयोगस्यतीव्रप्रयत्नेनोच्चारणाद्वालघुत्वमितिवाच्यम्। लङ्कजिह्वापठ्यते
विलङ्क इतिवचनस्ययदातीव्रप्रयत्नेनसंयोगस्याप्यगौरवम्। नच्छंदोभंग इत्याङ्करित्यादिसर
स्वतीकंठाभरणाद्युक्तवचनस्यचयत्रपर्वस्यैवगुरोर्लघुत्वमुक्तंतन्मात्रविषयकत्वादित्याङ्कः।
तन्नेतिबहवः बहिरिवेत्यादौविरम्यपाठेनैवलघुत्वोपपत्तेः संयोगपर्वस्यगुरुत्वेनिरंतरपाठस्ये
वबीजत्वात्। विरलोदाहरणेनानाकरव्याख्यायाश्रयुक्तत्वाच्च। इति।। ४।। यथाऽवदाहियतेइत्य
र्थः माणिनीतिहेमानिनिमानेनकिंफलंजेयतः कारणात्कांतकांतः ए ३० एवमेवमानंविनै
वेत्यर्थः। चरणपङ्कु चरणयोः पतितः एनमेवार्थंद्रढयतिसहजइतिभुजंगमः सर्पः सहजेसहज
तः स्वभावतः मणिमंत्राभ्यांविनैवेत्यर्थः यदिनमतितदामणिमंत्राभ्यांकिंकार्यंनकिमपीत्यर्थ
ः अत्रमाणहिंकांई इतिहिकारेकारोविंद्वयतावपिलघुभवतः एओ अत्रशुद्धौएकारौकारौजे

अत्रमिलनएकारोलघुर्भवति॥ दोहाछंदः॥ ६॥ रहव्यंजनसंयोगस्ययथा। चेउमहजइतिहेखु
ल्लणाअधमचेतः तुहत्वंसहजचंचलासभावचंचलंसुंदरिइहदहिंवलंतसुंदरीइहदेपतनत। पत्र
उणच्चल्लसि। परमपिनव्यंबदिदेदासि किंतुपुनस्तत्रैवउल्हसतउल्लासंविनोदंकुर्वतंकील
सिंक्रीडसि अत्रसुंदरिइतिइकारः इदइतिरकारहकारव्यंजनसंयोगेपरेलघुर्बोध्यः अन्य
थादोहासमचरणेएकादशमात्राणामुक्तत्वात्द्वादशमात्रापत्याछंदोभंगः स्यात्। उल्हइत्युका
रोपिल्हइतिलकारहकारसंयोगेपरेपिलघुर्बोध्यः। अन्यथाअत्रापिपर्ववदेवछंदोभंगा
पत्तिः॥ ७॥ अथदीर्घोगुरुर्भवतीतिपर्वोक्तापवादंनियमान्तरमाह। जइदीहोवीति। यदिदी
र्घोपिवर्णः लघुजिह्वयापठ्यतेभवतितदासोपिलघुः वर्णानपित्वरितपठितान्द्विमात्रा
नपिएकंजानीहि॥ ८॥ जहायथाएतदुदाहरतीत्यर्थः। अरेअरेइतिअरेरेदेहेकह्नकृष्ण

डगामगं इतश्चेतः पार्श्वद्वये चलंतीत्यर्थः छोटिं स्वल्पां गावं नावं वोहदिं चालयं कुगतिं जलमरण
जन्यनरकं न देहि मा प्रयच्छ। तइ एहि णइ संतार देइ। तं अस्या नद्याः पारगमनं दत्वा यतश्चा
लिंगनचुम्बनादि वांछसि तत्तद् गृहाण। अत्र प्रथमचरणे रे इत्यक्षरद्वयं लघुपठितं एकं दीर्घं
बोध्यं अन्यथा दोहा प्रथमचरणे त्रयोदशमात्रौचित्याद् द्वितीय रेकारीयमात्राद्वयाधिक्यात छंदो
भंगापत्तिः। एवं द्वितीयचरणे डगमगेत्यक्षरत्रयं एकं ह्रस्वरूपं द्विदीत्यक्षरद्वयमेकं दीर्घरूपं बो
ध्यं।। अन्यथा दोहा द्वितीयचरणे एकादशमात्राणामुक्तत्वात्तन्मतिमात्राद्वयाधिक्यात् देही
त्येकमात्राधिक्याच्च छंदोभंगः स्यात् तृतीयचरणे च णहीति केवल एकारः देइ इति दकारस्यै
कारश्च द्वावपि जिह्वालघुपठितौ लघुबोध्यौ।। अन्यथा दोहा तृतीयचरणे त्रयोदशमात्रौचि
त्यान्मात्राद्वयाधिक्यात छन्दोभंगः प्रसज्येत जिह्वालघुपठनं गुरूपदेशाद्बोध्यमित्यस्म

त्तातचरणोपदेशः सुधीभिर्विभावनीयः॥ ८॥ अथ छंदोग्रंथस्योपादेयतां दर्शयति। जेमणेति
जेमं यथा कणअ तुलां कनकस्य तुलापरिमाणनिर्णायकं यंत्रं कांटा इति लोके तुलिअं तुलितं
निर्णीयपरिमाणं स्वस्मिन्न्यस्तिमं सुवर्णं तिलस्य अद्ध अद्धेण चतुर्थांशेनापीति यावत् रत्तिका
माषकादिमापकात्। न्यूनाधिकमिति शेषः। णसहइ न सहते न निर्णीतपरिमाणं करोति तेम
तथा सवण तुलां श्रवणरूपां तुलेव तुला काव्यशुद्ध्यशुद्धिज्ञापकं यंत्रं छंदभंगेण छंदसां यथा
क्रमं छंदस्य गुरुलघुताभंगेन न्यूनाधिकभावेन त्यर्थः अवछंदं अपछंदस्कं लक्षणहीनं काव्य
न सहते न प्रमाणयति। अयमर्थः तुलायां सूत्रबद्धं पात्रद्वयं भवति तत्रैकपात्रे परिमाणसाध
नं रत्तिकामाषकादि द्रव्यं प्रक्षिप्य द्वितीयपात्रे प्रक्षिप्तं निर्णीयपरिमाणं सुवर्णादि द्रव्यं यदि ति एम
लचतुर्थांशेनापि परिमाणसाधनरत्तिकामाषकादिद्रव्यान्न्यूनाधिकं भवति तदा तत्र परिमा ६

पाशुद्धिर्यथा न भवति तथा लक्षणोक्तगुरुलघुहीनाधिकं काव्यं श्रवणविषयीभूतं शुद्धं न प्रतिभा
व्य तीति [redacted] कौशुध्यशुद्धिज्ञानार्थं छंदः शास्त्रमुपादेयमिति भावः ॥ १४ ॥ अथ छंदः शास्त्रविदां पु
रो लक्षणहीनकाव्यपठनं वारयन्पुनरपि छंदः शास्त्रैपादेयतां दर्शयति ॥ अबुहइति ॥ अबुधः
काव्यलक्षणानभिज्ञः । बुहाणंमझे बुधानां काव्यलक्षणाभिज्ञानां मध्ये लक्षणविहूणं विहीनं
कव्वं काव्यं पठइ पठति सः भुअग्गअग्गलग्गखग्गहिं भुजाग्रलग्नखड्गेन ॥ खुलिअं स्खलितं ग्रीवा
तः पतितं शीर्षमस्तकं न जाणेइ न जानाति सः स्वहस्तधृतखड्गेन स्वशिरः छेदक इव विक्षिप्तचि
त्त इति लोके व्यवह्रियते अतोऽधीतछंदः शास्त्रोक्तलक्षणालक्षितकाव्यपठनं पंडितात्ख्यालभते
इति छंदः शास्त्रोपादेयता दर्शितेति भावः ॥ ११ ॥ अथ वक्ष्यमाणमात्राछंदः स्वपयुक्तानां गणा
नां व्यवहारार्थं संज्ञाभिरुद्दिशति ॥ टठु इति ॥ टठडढाणं टठडढणेः छपचतदा ॥ छपचतदैः एते पंच

स्वर१ उ१

 अकूँओंपंचासैरैः जहसंख्यंयथासंख्यंछप्पंचचौत्तिदुकलासुषट्पंचचतुस्त्रिद्विकलेषुगणभे

 आगणमध्येभेदानामानिहोंतिभवंतिअयमर्थः षट्कलगणस्यटगणछगणेतिनामद्वयं।पं

चकलगणस्यठगणपगणेतिनामद्वयं।चतुष्कलगणस्यडगणचगणेतिनामद्वयं।त्रिकलगण

स्यढगणतगणेतिनामद्वयं।द्विकलगणस्यणगणदगणेतिनामद्वयं।भवतीतिबोध्यमिति

॥१२॥अथटगणादीनांभेदसंख्यामाहटगणोतेरहइति॥ टगणः षट्कलः त्रयोदशभेदः॥ठ

गणस्सं ठगणस्यपंचकलस्येतियावत्॥ अट्ठाई अट्ठैभेआभेदाहोंतिभवंतिडगणस्सडगण

स्यचतुष्कलस्येतियावत्पंचभेदाभवंति। ढगणेत्रिकलेतिअत्रयोभेदाभवंतीत्यनुकर्षः॥ण

गणस्यद्विकलस्यबेविद्वौभेदौभवतइतिशेषः॥१३॥अथषट्कलादिगणंत्रयोदशादिभेदा राम॰

उक्तास्तेषांरचनाप्रस्तारस्तत्प्रकारमाह।पढमगुरुहेट्ठेति।पढमगुरुहेट्ठाणेप्रथमगुरो

स्य२

रधः स्थाने द्वगणभेदे यः प्रथमगुरुस्तदधः स्थाने इत्यर्थः लङ्कश्चापरिद्विकङ्कलघुंपरिस्थापयत।
तद्द्वये चेति शेषः। तस्य लघोरग्रे चेत्यर्थः सरिसासरिसापत्तीसदृशीसदृशीपंक्तिः कर्त्तव्येति शेषः।
यस्य गुरोरधो लघुः स्थापितस्तस्याग्रे येन क्रमेण यावद्गुरुर्लघुर्भवेत्तेनैव क्रमेण तावद्गुरुर्ल
घुर्गुर्वधः स्थलघोरग्रे स्थाप्यमित्यर्थः उव्वरिआ। उर्वरितां मात्रामिति शेषः गुरुलहू गुरुलघुरू
पामिति यावत्तदेङ्कदहि गुर्वधः स्थलघोरग्रे तथा गुरुलघुस्थापने कृते सति तन्देदमध्ये उर्वरि
तायामात्रा सा यथा सन्निवेशं गुरुलघुरूपेण गुर्वधः स्थलघोः पश्चात्स्थापनीयेत्यर्थः तत्रय
दि मात्रापंचकमवशिष्टं तदा प्रथमं गुरुद्वयं तत एको लघुः स्थाप्यः अथ मात्राचतुष्टयं तदा
गुरुद्वयं स्थाप्यं यदि मात्रात्रयं तदा प्रथममेको गुरुस्ततो लघुर्यदि मात्राद्वयं तदेको गुरुर्यद्ये
का मात्रा तदेको लघुः स्थाप्य इत्यर्थः एवं च प्पबुद्धी ए आमबुध्याश्चामो गुरुस्तस्य बद्धिरूपरे

 देशस्तेनेत्यर्थः मात्राप्रस्तारणे नीतेति शेषः प्रस्तारो भेदरचना अत्रायंविधिर्यावत्सर्वे लघुर्भेदो
 भवति तावत्कार्य इति गुरूपदेशाद्बोध्यं। अनेदमुक्तं भवति। षट्कलगणस्य प्र[redacted]स्तारे चिकी
र्षिते षण्मात्राणां गुरुत्रयं स्थाप्यं ऽऽऽ सोयं षट्कलस्य प्रथमो भेदः अत्र प्रथमगुरोरध एकोल
-8 घुर्देयः लघोरग्रे चोपरितनसादृश्याद्गुरुद्वयं पश्चाच्चोर्वरितैकमात्रारूप एकोलघुर्देय इति
प्रथमं लघुद्वयं ततो गुरुद्वयं यत्र पतति ॥ऽऽ स षट्कलस्य द्वितीयो भेदः एवं द्वितीयभेदस्य तृती
यवर्णः प्रथमं गुरुस्तदधो लघुः स्थाप्यो लघोरग्रे चोपरितनसादृश्यादेको गुरुः स्थाप्यः उर्व
रितं च मात्रात्रयं गुरुलघुरूपं क्रमेण पश्चात्स्थाप्यं एवं यत्र लघुगुरुलघुगुरवः क्रमेण पतंति
।ऽ।ऽ स तृतीयो भेदः एवं अस्य द्वितीयो वर्णः प्रथमगुरुस्तदधो लघुः स्थाप्यस्तदग्रे चोपरित राम॰
नसादृश्याल्लघुगुरू क्रमेण स्थाप्यौ पश्चाच्चोर्वरितं मात्राद्वयमिति गुरुर्देयः एवं गुरुलघुल ८

घुगुरवोयत्रपतंति ऽ।।ऽ सोस्यचतुर्थोभेदः एवमस्यप्रथमोगुरुस्तदधोलघुर्देयस्तस्याग्रे
उपरितनसादृश्याल्लघुद्वयानन्तरमेकोगुरुः स्थाप्यः पश्चादुर्वरितैकमात्रालघुरूपादेयाएवंय
त्रलघुचतुष्टयानंतरमेकोगुरुः पतति ।।।।ऽ सोऽस्यपंचमोभेदः एवमस्यांत्योवर्णः प्रथमगु
रुस्तदधोलघुर्देयउपरितनसादृश्याभावातउर्वरितंमात्रापंचकंद्विगुरुलघुरूपमंत्यलघोः
पर्वंक्रमेणस्थाप्यमेवंचयत्रप्रथममेकोलघुस्ततोगुरुद्वयोत्तरमेकोलघुःपतति ।ऽऽ। सोस्य
षष्ठोभेदः एवमस्यद्वितीयोवर्णः प्रथमगुरुस्तदधोलघुः स्थाप्यस्तस्याग्रेउपरितनसादृश्यात
गुरुलघुस्थाप्योपश्चादुर्वरितंमात्राद्वयमेकगुरुरूपंस्थाप्यंएवंयत्रप्रथमंगुरुलघुततोपिगु
स्य रुलघ [redacted] ऽ।ऽ। एवंमतोसप्तमोभेदः एवमस्याद्योगुरुः प्रथमस्तस्याधोलघुः स्थाप्योल
घोरग्रेउपरितनसादृश्याल्लघुगुरुलघवः क्रमेणस्थाप्याउर्वरिताचैकामात्रालघुरूपाप

पिं॰ग॰गु॰टी श्चात्स्थाप्या एवं यत्र प्रथमं लघुत्रयं ततो गुरुर्लघुः पतति ।।।ऽ। सोऽष्टमो भेदः एवमस्य चतुर्थो
२ वर्णः प्रथम गुरुस्तदधो लघुः स्थाप्यस्तस्याग्रे उपरितन सादृश्यादेको लघुः स्थाप्य उर्वरितं च
मात्राचतुष्टयं गुरुद्वयरूपं पश्चात्स्थाप्यं एवं यत्र प्रथमं गुरुद्वयं ततो लघुद्वयं पतति ऽऽ।।
९ एवंभूतोऽस्य नवमो भेदः एवमस्य प्रथमो वर्णः प्रथमगुरुस्तदधो लघुः स्थाप्यस्तस्याग्रे उप
रितनसादृश्यादेको गुरुस्ततो लघुद्वयं देयं उर्वरिता चैका मात्रैकलघुरूपा पश्चाद्देया एवं च यत्र
लघुद्वयोत्तरमेको गुरुस्ततो लघुद्वयं पतति ।।ऽ।। एवंभूतोऽस्य दशमो भेदः एवमस्य तृतीयो व
र्णः प्रथमगुरुस्तदधो लघुः स्थाप्यस्तस्याग्रे उपरितनसादृश्याल्लघुद्वयं स्थाप्यं उर्वरितं मात्रा
त्रयं गुरुलघुरूपं पश्चात्स्थाप्यं एवं यत्र प्रथमं लघुगुरू ततो लघुत्रयं पतति ।ऽ।।। सोऽस्यैका एम॰
दशो भेदः एवमस्य द्वितीयो वर्णः प्रथमगुरुस्तदधो लघुः स्थाप्यस्तस्याग्रे उपरितनसादृश्या २

लघुत्रयंस्थाप्यंउर्वरितंचमात्राद्वयमेकगुरुरूपंपश्चात्स्थाप्यंएवंयत्रप्रथममेकोगुरुःततोल
घुचतुष्टयंपतति ऽ।।।। एवंमत्तोस्यद्वादशोभेदः एवमस्याद्योगुरुः प्रथमस्तदधोलघुः स्थाप्य
स्तस्याग्रेउपरितनसादृश्यात्चत्वारोलघवः स्थाप्या उर्वरितेकापश्चादेकलघुरूपादेयाएवंय
त्रलघुषट्कंपतति ।।।।।। सोस्यान्तिमस्त्रयोदशः एतदग्रेचगुरोरभावान्नप्रस्तारः। अथपंचकल
प्रस्तारेचिकीर्षितेप्रथममेकोलघुस्ततोगुरुद्वयमेवंपंचमात्राकः सर्वगुरुः स्थाप्यः नष्टोद्दिष्टयो
स्तथैवपंचकलप्रथमभेदसिद्धेः ।ऽऽ सोयंपंचकलस्यप्रथमोभेदस्तस्यद्वितीयोवर्णः प्रथम
गुरुस्तदधोलघुर्देयस्तस्याग्रेउपरितनसादृश्यादेकोगुरुर्देयः उर्वरितंमात्राद्वयंएकगुरुरूपं
पश्चाद्देयमितिपत्रगुरुलघुगुरवः क्रमेणपतंति ऽ।ऽ सपंचकलस्यद्वितीयोभेदः एवमस्या
द्योवर्णः प्रथमगुरुस्तदधएकोलघुः स्थाप्यस्तस्याग्रेउपरितनसादृश्याल्लघुगुरूस्थाप्योउर्व

पिं.ग.सु.टी. रितैकामात्रा लघुरूपा पश्चाद्देया एवं यत्र लघुत्रयोत्तरं गुरुः पतति ।।।ऽ सोऽस्य तृतीयो भेदः । एवम
१० स्य चतुर्थो वर्णः प्रथमगुरुस्तदधो लघुर्देयः उपरितनसादृश्याभावात्तस्य पश्चादुर्वरितं मात्राचतुष्ट
यं गुरुद्वयरूपं देयमिति यत्र गुरुद्वयोत्तरं लघुः [redacted] पतति ऽऽ। सोऽस्य चतुर्थो भेदः एवमस्य प्रथ
1o मो वर्णः प्रथमगुरुस्तदधो लघुर्देयस्तस्याग्रे उपरितनसादृश्या द्गुरुलघू देयौ उर्वरिता चैका मा
त्रैका लघुरूपा पश्चाद्देयेति यत्र लघुद्वयोत्तरं गुरुलघू पततः ।।ऽ। सोऽस्य पंचमो [redacted] भेदः एवमस्य
तृतीयो वर्णः प्रथमगुरुस्तदधो लघुर्देयस्तस्याग्रे उपरितनसादृश्यादेको लघुर्देयः उर्वरितं मात्रा
त्रयं गुरुलघुरूपेण पश्चाद्देयमिति यत्र लघुगुरुलघुद्वयं च क्रमेण पतति ।ऽ।। सोऽस्य षष्ठो भेदः
एवमस्य द्वितीयो वर्णः प्रथमगुरुस्तदधो लघुर्देयस्तस्याग्रे उपरितनसादृश्याल्लघुद्वयं देयं पश्चा राम०
दुर्वरितं मात्राद्वयमेकगुरुरूपं देयमिति यत्र गुरूत्तरं लघुत्रयं पतति ऽ।।। सोऽस्य सप्तमो भेदः १०

एवमस्यप्रथमोवर्णः प्रथमोगुरुस्तदधोलघुर्देयस्तस्याग्रेउपरितनसादृश्यात्लघुत्रयंदेयंप
श्चादुर्वरितेकामात्रैकलघुरूपादेयेतियत्रपंचलघवः पतंति ॥१॥ सोऽस्यप्रथमोभेदः एतदुत्तरंचगु
रोरभावान्नप्रस्तारः॥ अथचतुष्कलप्रस्तारेचिकीर्षितेगुरुद्वयंस्थाप्यंअयंचतुष्कलस्यप्रथ
मोभेदः॥ अस्यप्रथमोवर्णः प्रथमगुरुस्तदधोलघुर्देयस्तस्याग्रेउपरितनसादृश्यादेकोगुरु
र्देयः पश्चादुर्वरितेकामात्राएकलघुरूपादेयेतियत्रलघुद्वयोत्तरंगुरुः पततिः॥ऽ सोऽस्यद्विती
योभेदः एवमस्यतृतीयोवर्णः प्रथमगुरुस्तदधोलघुर्देयस्तस्यपश्चादुर्वरितंमात्रात्रयंगुरुल
घुरूपंक्रमेणदेयमितियत्रलघुगुरुलघवः क्रमेणपततिः।ऽ। सोऽस्यतृतीयोभेदः एवमस्यद्विती
यावर्णः प्रथमोगुरुस्तदधोलघुर्देयस्तस्याग्रेउपरितनसादृश्यादेकोलघुर्देयः पश्चादुर्वरित
मात्राद्वयमेकगुरुरूपंदेयमितियत्रैकगुरूत्तरंलघुद्वयंपतति ऽ॥ सोऽस्यचतुर्थोभेदः एव

मस्याद्योवर्णः प्रथमगुरुस्तदधोलघुर्द्वेयस्तस्याग्रेऽउपरितनसादृश्याल्लघुद्वयंपश्चादुर्वरितैक
मात्रालघुरूपादेयाएवंयत्रलघुचतुष्टयंपतति ।।।। सोऽस्यपंचमोभेदः एतदग्रेगुरोरभावान्न
प्रस्तारः एवं।त्रिकलेलघोरग्रेगुरुः स्थाप्यः। ऽ अयंत्रिकलस्यप्रथमोभेदस्तत्रद्वितीयोवर्णःप्र
थमगुरुस्तदधोलघुर्लघोः पश्चात्गुरुः एवंयत्रगुरुलघुक्रमेणपततः ऽ। सोऽस्यद्वितीयोभेदः
एवमस्यप्रथमोवर्णः गुरुस्तदधोलघुः स्थाप्यस्तस्याग्रेसादृश्याल्लघुः स्थाप्यउर्वरिताचैकामा
त्रासापश्चात्स्थाप्या।।।।एवंलघुत्रयात्मकोऽस्यतृतीयोभेदः। वर्णप्रस्तारेचैतस्माद्दयमेवभेदा
यदुर्वरितेयथाऽपेक्षंगुरुरेवदेयइति॥ तदुक्तंवृत्तरत्नाकरेपादेसर्वगुरावाद्याल्लघुंन्यस्यगुरो
रधः। यथोपरितथाशेषंभूयः कुर्यादिमंविधिंतावद्दद्याद्गुरूनेवयावत्सर्वंलघुर्भवेत्॥ प्रस्तारोऽयं
समाख्यातश्छंदोविचितिवेदिभिरिति॥ १४॥ अथवक्ष्यमाणमात्राछंदः सुव्यवहारार्थंषट्कल

त्रयोदशभेदानांक्रमेणनामान्याह। हरइति। हरः शशी सूर्यः सूरः शक्रः शेषः अहिः कमलं
। ब्रह्मा। कलिः। चंद्रः। ध्रुवः। धर्मः शालिचरः छमूत्तास्तंषरामात्रकानां त्रयोदशभेदानां एतानि
तेरहणामं त्रयोदशनामानि यथासंख्यं बोध्यानीत्यर्थः॥१५॥ अथपंचकलाष्टभेदानांप्रत्येकं
नामान्याह॥ इंद्रासणेति। ~~इंद्रासणेति~~। इंद्रासनं। अरुः अपरः सूरः चापः हीरः शेखरः कुसु
मः अहिगणः पदातिगणः। पंचकलगणे एतानिनामानि क्रमेणेति शेषः पिंगलेन कथितानि
पंचकलगणस्य ये अष्टौ भेदास्तेषांप्रत्येकमेतान्यष्टौनामानि पिंगलेन कथितानीत्यर्थः॥१६॥
अथचतुष्कलगणपंचभेदनामान्याह गुर्विति। गुरुजुअ। गुरुयुगं। गुरोर्युगंद्वयंयस्मिन्ने
तादृशोयोभेदः स इत्यर्थः। कण्णो। कर्णः। चतुष्कलस्यप्रथमोभेदः कर्णनामेत्यर्थः। गुर्वंतः गु
रुरंते यस्य तादृशो द्वितीयोभेदः करतलनामक इत्यर्थः। गुरुमध्यः गुरुः मध्येयस्य स तृतीया

पिंग·गु·टी भेदः पयोधरनामक इत्यर्थः मिपादपूरणे। आदिगुरुः आदौ गुरुः यस्य तादृशस्तृतीयो भेदो
१२ वसुः चरणः इति तस्य नामद्वयं। सर्वैः लघुभिः सर्वलघुः पंचमो भेदः विप्रः विप्रनामेत्यर्थः॥१७॥
अथ त्रिकलप्रथमभेदस्य लघ्वादेर्नामान्याह ध्वज इति। ध्वजः चिन्हं चिरं चिरालयः तोमरं तुंबु
रुः पत्रं चूतमाला रसः वासः पवनः वलयः। एतानि नामानीति शेषः। लघुकालत्वेन लघ्वादेस्त्रि
कलप्रथमभेदस्येत्यर्थः। जाणेह्न जानीतेत्यर्थः॥१८॥ अथ त्रिकलद्वितीयभेदस्य गुर्वादेर्नामा
न्याह सुरव इति। सुरपतिः पटहः तालः करतालः नंदं छंदः णनतु निश्चयेनानिर्वाणं। समुद्रं तूर्यं।
एहं एतानि नामानि। प्रमाणेन प्रमाणेन। गुर्वादेस्त्रिकलस्य जानीतेति शेषः इति संप्रदायविदः
।एवमग्रेपि॥१९॥ अथ सर्वलघोस्त्रिकलस्य नामान्याह भावेति भावः रसः ताडवं नारी अहरकु राम०
लभामिनी इति नामानि त्रिलघुगणस्य कविवरः पिंगलः कथयति॥२०॥ अथ द्विकलप्रथ १२

मभेदस्यैकगुरोर्नामान्याह। णेउर इति नूपुरं। रसना आभरणं चामरं। फणिमुग्धः कनकः। कुंड
लं। वक्रः। मानसः वलयः। हारावलिः हारः गुरुकस्य एकगुरोः एतानि नामानीति शेषः इति गु
रूपदेशाः॥ २१॥ अथ द्विलघोर्नामान्याह णिअ पिअ इति। निजप्रियः परमः सुप्रियः द्विलघो
ः इति नामानीति शेषः समासतः कविदृष्टानि॥ अथ लक्ष्यानुसारेण चतुष्कलभेदानां नामांतराण्याह अहेति अथ चउमत्तह चतुर्मात्रकं पइगणं प्रतिगणं चतुर्मात्रकगणस्येति यावत्। णामेनामानि फणिराजः पिंगलः भणति॥ २२॥ सुरलयः। पूर्वसमत्वात् अत्र कश्चित् चतुष्कलस्य नामान्याह सुरेति सुरतन अ सुरतनयः सुरतलतेति वा इत्यादि गुरुयुगलं। कर्णसमानेन शब्देनेति शेषः तेन कुंतीपुत्रो राधेय इत्यादीनि रसिकः रसः लगः मनोहरणः। सुमतिलंबितः पादइति पादपूरणो। सुवर्णेन सह। सुवर्णमित्यपि नामान्तरं लहुरहिअं लघुरहितमिति नाम लहलहीति

 पाठेन्तनशीतलहरितत्वादिनारमणीयतार्वपीलहलहीति देशीयस्तत्पर्यायाश्चप्पस्यनामा
१३ नीत्याङ्कः ताइतिपादपूरणे।सुवर्णेनसह।सुवर्णमित्यपिनाम॥२३॥ अथांतगुरोश्चतुष्कलस्य
नामान्याहकरेति करः पाणिः कमलं। हस्तः बाहुः भुजदंडः प्रहरणं। अशनिः। गजाभरणं। रत्न
13 नामा।भुजाभरणंकेयूरादिभवंति।सुप्रसिद्धानिनामानिगुर्वंतस्येति शेषः इति गुरूपदेशः॥२४॥
अथमध्यगुरोश्चतुःकलस्यनामान्याह।भुवइति।भूपतिः अश्वपतिः नरपतिः गजपतिः वसु
धाधिपः राजा गोपालः उन्नायकः चक्रवर्त्तीपयोधरः स्तनः नरेंद्रइति मध्यगुरोश्चतुःकलस्य
नामानीति गुरूपदेशाद्बोध्यं॥ अथादिगुरोश्चतुष्कलस्यनामान्याहपअइति।पदं पादः चरणयुग
लं।अपरं नाम।पञ्चासेइ।प्रकाशयति।गंडः बलभद्रः तालः पितामहः दहनः नूपुर रतिः। जंघयु राम०
गलेण।ननु जंघयुगलं।इति मध्यगुरोश्चतुष्कलस्य नामानि पिंगलः प्रकाशयति॥२६॥ अथ १३

चतुर्लघोर्नामान्याह। पाठममिति। विप्रः एरिसिं एताह शंइदमितियावत्पठमं प्रथमं नामेति
शेषः वीए द्वितीयं नामेत्यनुकर्षः सरपंचपंचशर अवह तुभाषायां पूर्वनिपातानियमात्। जाइ
सिहरेहिं जातिः शिखरेण सह। तेन शिखरं जातिः इत्यपि नामद्वयमित्यर्थः। द्विजवरः परमः पापः
एतानि नामानीति शेषः चउक्केण लहुएण। चतुष्केन लघुकेन। उपलक्षितानि होंति भवंति॥ २७॥
अथ पंचकलानां वर्णमात्रासाधारणानां नामान्याह। सुणरिंदेति सुनरेंद्रः अहितः कुंजरः गज
वरः दंतः दंती अथ मेघः अथ इति वाक्यालंकारे। ऐरावतः। तारापतिः गगनं सर्पः तलं एतानि
नामानि। पेण। पगणेन। पंचकलेनेति यावत्। उपलक्षितानि बोध्यानि॥ २८॥ अथ मध्यलघो
ः पंचकलस्य नामान्याह पक्खीति॥ पक्षी विराट मृगेन्द्रः वीणा अहिः पक्षः अमृतं जोहल कः सु
पर्णः पन्नगाशनः गरुडः एतानि नामानि मध्यलघोः विजानीत॥ २९॥ अथ पंचकलस्य पन:

पिं॰ग॰सु॰टी॰
१४
14

सामान्यानिनामान्याह।बहुविविहेति।बहुविविधप्रहरणैः सर्वैः शस्त्रायुधकैः शब्दैः पंचक
लोगणोभवतिबुध्यतेइत्यर्थः॥अथचतुःकलस्यसामान्यानिनामान्याह॥गअरहेति।गजः
रथः तुरगः पदातिः एतैर्नामभिः जानीहिचतुर्मात्रिकान्॥३०॥अथैकगुरोर्नामान्याहताल
केति।ताटंकः हारः नूपुरं।केयूरं।एतानिगुरुभेआगुरुभेदा।गुरोर्नामानीतियावत्‌होंतिभवंति
॥अथैकलघोर्नामान्याहसरेति शरः मेरुः दंडः काहलः एताइ।एतानिलहुभेआलघुभेदाल
घोर्नामानिहोंति॥३१॥ शंखः पुष्पं।काहलं।रवः कनकंलतारूपंगणाणाकुसुमं।पुष्पजातीनां
यावंतिनामानितानिसर्वाणीत्यर्थः।रसः गंधः शब्दः एतैः अशेषैः लघुभेदाभवंतीत्यनुकर्षइति
प्रमाणंनिश्चयः॥३२॥अथवर्णवृत्तोपयोगिनोमगणादीनष्टौगणान्नामलक्षणाभ्यामुद्दिश राम॰
ति।मोत्तिगुरू।त्रिगुरुः गुरुत्रयस्वरूपोमोमगणः ऽऽऽ तिलहूत्रिलघुः लघुत्रयस्वरूपइति १४

यावत्तर्णो नगणः ।।। लघुगुरू आद्ययभौ लघुगुरू आदौ ययोस्तौ यभौ यथासंख्यं यगणभग
णसंज्ञकौ तेन आदौ यस्य लघुः सयगणः आदौ यस्य गुरुः सभगणः इत्यर्थः मध्यगुरुः यस्य म
ध्ये गुरुः सजगणः मध्यलघुः यस्य मध्ये लघुः ऽ।ऽ सरो रगणः अंतगुरुः यस्य अंते गुरुः स पु
नः सो सगणः अंतलघुना उपलक्षितः तो तगणः यस्यांते लघुः स त [redacted] गण इत्यर्थः ॥३३॥ मनु
ष्यकवित्वे कविनायकयोः देवताकवित्वे देवतानां दुःप्रधर्षत्वात्कवेरेव कवित्वस्यादौ दुष्टगण
पाते अनिष्टफलप्राप्तिस्तच्छांत्यर्थं शुभगणपाते शुभफलवृद्धये च तत्तद्गण देवता दुःप्रध
र्षत्वात्कवेरेव कवित्वस्यादौ दुष्टगणपाते पूज्या इति मगणादृष्टगणानां क्रमेण ता आह पृ
थ्वीति पृथिवी मगणस्य त्रिगुरोः जलं जलं नगणस्य त्रिलघोः २ शिखी अग्निः यगणस्यादि
लघोः ३ कालः भगणस्यादिगुरोः ।४। गगनं मध्यगुरो जगणस्य ।५। सूर्यश्च मध्यलघो रग

पिंग.शु.टी. णस्य ६ चंद्रमाः अंतगुरोः सगणस्य नागः अंतलघोस्तगणस्य ८ एतेगणाष्टकेष्टदेवाः यथासं
१५ ख्यंपूर्वोद्देशक्रमेणपिंगलेनकथिताः।३४॥ वक्ष्यमाणाशुभाशुभफलोपोद्घातेनगणानां
परस्परमित्रादिभावंकथयतिमगणनगणौ ऽऽऽ० ।।।० द्वौगणौमित्रंमित्रेमित्रसंज्ञावितिया
वत्भवतः। भगणयगणौद्वौगणौ ऽ।।० ।ऽऽ० भृत्यौभृत्यसंज्ञौभवतः। जतौजगणतगणौ।।द्वौ
गणौउदासीनौउदासीनसंज्ञौ। अवशिष्टौद्वौगणौरगणसगणौ। अरीशत्रुसंज्ञौनित्यंभवत
इतिक्रियापदंद्विवचनांतेनसर्वत्रयोज्यं॥३५॥ अथमगणाद्यष्टगणानांकाव्यादौपतनेप्रत्ये
कंफलमाह। मगणेति। कवित्वस्यादौयदिमगणःपततितदाऋद्धिःकार्यस्थिरंददातीत्याकर्षः
यदियगणःपततितदासुखसंपदंददाति। यदिरगणःपततितदामरणंप्रयच्छति। यदिस राम०
गणःपततितदासहवासान्निजदेशादुद्वासयति।यदितगणःपततितदाशून्यफलंकथ १५

यति। यदि जगणः पतति तदा खरकिरणं संतापं विसर्जयति। भगणः अनेकानि मंगलानि
कथयति। यावत्काव्यगाथादोहास्तत्र प्रथमाक्षरे प्रथमगणो यदि णगणो भवति तदा तत्र ऋ
द्धिबुद्धयः सर्वाः स्फुरंति रणे राजकुले दुस्तारं तरति इति मुणाळु जानीत इति कविपिंगलः भाषते
॥ अत्र मनुष्यकवित्वेन दृगं तत्फलं पर्वतादिवर्णानेक विगतं देवतावर्णने न क्वापि। तदुक्तमभि
युक्तैः वर्ण्यते मनुजो यत्र फलं तद्दृतमादिशेत॥ अन्यथा तु कृते काव्ये कवेर्दोषावहं फलं देवता
वर्ण्यते यत्र काव्ये क्वापि कवीश्वरैः मित्रामित्रविचारो वा न तत्र फलकल्पनेति॥ ३६॥ अथ पूर्वोक्त
गणगुणानपवदन् द्विगणविचारमाह मित्तमित्तेति। मित्रात् मित्रं यदि पतति तदेति शेषः सर्व
त्र यथायथं योजनीयः ऋद्धिं बद्धिं अपरं मंगलं ददाति॥ मित्रात् भृत्यो यदि पतति तदा युद्धे स्कं
धस्थैर्यं निर्भयं जयं करोति। मित्रात् उदासीनः यदि पतति तदा कार्यबंधः कार्यप्रतिबंधः खलु

पुनः पुनः करोति। मित्रात्‌ यदि शत्रुः भवति तदा गोत्रबांधवान्पीडयति। अपरं भृत्यात्‌ मित्रं यदि प-
तति तदा सर्वाणि कार्य्याणि भवंति भृत्यात्‌ भृत्यं यदि पतति तदा आयतिः उत्तरकालो वर्द्धते। भृ-
त्यात्‌ उदासिनः यदि पतति तदा धनं नश्यति। भृत्यात्‌ वैरि यदि ॰ पतति तदा हाक्रंदः हाहाकारः
पतति॥ ३७॥ उदासिनात्‌ यदि मित्रं पतति तदा कार्ये किमपि अनिष्टं दर्शयति। उदासीनात्‌ य-
दि भृत्यं पतति तदा सर्वं अपत्यं चालयति उदासीनात्‌ यदि उदासिनः पतति तदा असम्यक्‌ सम्यक्‌
किमपि न दृश्यते। उदासीनात्‌ यदि शत्रुः पतति गोत्रोपि वैरीकृतो स्येयः यदि शत्रोर्मित्रं भवति त-
दा शून्यं फलं भवति किमपि फलं न भवतीत्यर्थः यदि शत्रोर्भृत्यो भवति तदा गृहिणी नश्यति। पुनः
शत्रोः उदासीनः यदि पतति तदा धनं नश्यति यदि शत्रोः शत्रुः पतति तदा नायकः स्वबलति नश्य- राम॰
तीत्यर्थः॥ ३८॥ निर्दिष्टप्रस्तारकमस्थिति निर्द्धारितसंख्याकगुरुलघुयुक्तस्वरूपनिर्णीत १६

प सर्वां आपत्तिमिति पाठः

स्वरूपे भेदं प्रथमत्वद्वितीयत्वादिधर्मं निर्द्धारणमुद्दिष्टं। तद्द्विविधं। मात्रावर्णभेदात्। तत्र केनचिल्लोत्तुकाद्दुर्णोद्दिष्टे एष्टे तत्प्रकारमाह। पुव्व जुअलेति। पुव्व जुअलसरिअंका। पूर्वयुगलसदृशांका। अत्र पूर्वपदस्य पूर्वांकपरत्वात् पूर्वयुगलेत्यस्य पूर्वांकयुगलेत्यर्थः। एवं च पूर्वपदं कयुगलं तत्सदृशं तत्तुल्यं तदैक्यक्रियया यत् संपद्यते इति यावत् तदंकमित्यर्थः। दिज्जसु। दद्स्व। अत्र निर्द्धारितप्रथमत्वद्वितीयत्वादिधर्मकभेदस्वरूपं लिखित्वा तदुपरि पूर्वांकयुगलसदृशांकं यथाप्रस्तारसंख्यक्रमेणोत्तरोत्तरं स्थापयेत्यर्थः। अत्र यतः पूर्वांकपूर्वं नास्ति तत्र प्रथमातिरेके कारणाभावात् प्रथमोंकः स्थाप्यः यतश्च पूर्वांकयुगलं नास्ति तत्र य एव पूर्वं अंको भवति तद्द्विगुणितमंकं स्थाप्यमिति गुरूपदेशोऽनुसंधेयः। ततः गुरुसिरअंकन्ह। गुरुशिरोंकान्। गुरोः। शिरसि येऽङ्कास्तान्। सेसा शेषा। सव्वांतिम अंके। मिटिज्जसु। लोपय। गुरुशिरोंकबोधितसंख्यां।

पिंग॰गु॰टी॰ १७ सर्वांतिकांकबोधितसंख्यायामनंकुरु इति भावः एवं सति उवरले अंकं उर्वरितं अंकं गुरुशिरो

कबोधितसंख्यालोपे सति सर्वांतिमांकमध्ये उर्वरितो योंकस्तमित्यर्थः सर्वांतिमांकबोधितसं

ख्यामध्योर्वरितसंख्याबोधकमंकमितियावत्। लेक्खिकइं लेखनं प्रसंख्यायनिर्ण्ये घेतियाव

17 त्। आनरु आनय त्वं जानीहि इति यावत् तेहि परतदुपरि तेनेतियावत् मात्राणामिति शेषः उ

द्दिठ्ठं उद्दिष्टं अनिर्द्धारितप्रथमत्वद्वितीयत्वादिधर्मभेदे प्रथमत्वद्वितीयत्वादिधर्मनिर्द्धारणं धु

अं धुवं निश्चितं जाणरु जानीहि। अत्र गुरुशिर इति शिरःपदोपादानात् गुरोरुपर्य्यधश्चांकोदे

य इति सूच्यते अन्यथा वर्णोद्दिठ्ठे लब्धे लघूपरीतिवदत्रापि गुरोरुपरि इत्येव ब्रूयात् लघोस्तु उ

पर्य्येवेति नियमो गुरुपरिष्टोऽनुसंधेयः अयमर्थः अनिर्द्धारितप्रथमत्वद्वितीयत्वादिधर्म राम॰

भेदस्वरूपं विन्यस्य प्रथमाक्षरोपरि एकत्वसंख्याबोधकोंकः स्थाप्यः द्वितीयाक्षरोपरि च सर्वा १७

कद्वयाभावात्पूर्वस्थैकांकद्वैगुण्यकल्पनानिःपन्नो द्वितीयोंकः स्थाप्यः। तृतीयस्थाने च तत्पू
र्वद्वितीयेकेत्यंकद्वयैक्यक्रियानिष्पन्नः तृतीयोंकः स्थाप्यश्चतुर्थस्थाने च तत्पूर्वतृतीयद्विती
येत्यंकद्वयैक्यक्रियानिःपन्नः पंचमोंकः स्थाप्यः। पंचमस्थाने च तत्पूर्वपंचमतृतीयेत्यंकद्व
यैक्यक्रियानिःपन्नोऽष्टमोंकः स्थाप्यः षष्ठस्थाने च तत्पूर्वाष्टमपंचमेत्यंकद्वयैक्यक्रियानि
ःपन्नस्त्रयोदशोंकः स्थाप्यः एवं षट्सु स्थानेषु षडंकाः यथाप्रस्तारसंख्यं षट्कलगणोद्दिष्टे स्था
प्याः एवं पंचकलादावपि यथाप्रस्तारसंख्या मंकाः स्थाप्याः एवं च त्रिगुरुः षट्कलस्य कतमो
भेद इति पृष्टे गुरुत्रयं लिखित्वा तत्र एकद्वित्रिपंचाष्टत्रयोदशेति षडंकान् क्रमेण गुरूणाम
पर्यधश्च संस्थाप्य गुरुशिरस्थैकतृतीयाष्टमेत्यंकत्रयावबाधितद्वादशसंख्यायाः शेषांक
त्रयोदशबाधितसंख्यामध्ये लोपउर्वरिताएकत्वसंख्या एवं च त्रिगुरुः षट्कलस्य प्रथमो भे

पिं०गु०टी० भेदइतिवाच्यंएवंलघुद्वयोत्तरंगुरुद्वयंपततिएतादृशःषट्कलस्यकतमोभेदइतिपृष्टेपूर्वोक्त
१८ रीत्यायथास्थानंषडंकान्संस्थाप्यगुरुशिरःस्थतृतीयाष्टमेत्यंकद्वयैक्यक्रियानिःपन्नैका
18 दशांकबोधितसंख्यायास्त्रयोदशसंख्यामध्येलोपेउर्वरितद्वित्वसंख्यातथाचायंद्वितीयोभे
दइतिवाच्यं।एवंयत्रादौलघुगुरूततोपिलघुगुरूएवंभूतःषट्कलस्यकतमोभेदइतिपृष्टेउ
क्तरीत्याउक्तस्थानेषट्कान्षडंकस्थापनेगुरुशिरःस्थद्वितीयाष्टमेत्यंकद्वयैक्यक्रियानिःपन्न
दशांकबोधितसंख्यायास्त्रयोदशसंख्यामध्येलोपेअवशिष्टत्रित्वसंख्यातथाचायंतृती
योभेदइतिवाच्यं।एवमग्रेपिगुरुशिरोंकसंख्यायास्त्रयोदशसंख्यामध्येलुप्तोर्वरितसंख्यात
तमोभेदोवाच्यः।षड्लघुरूपेगुरुशिरोंकाभावादाद्यर्थसमाजसिद्धस्तादृशस्त्रयोदशोभेदोबोध्य राम०
ः॥एवंपंचकलप्रस्तारेपिअनिर्द्धारितप्रथमत्वद्वितीयत्वादिधर्मभेदंलिखित्वातद्रूपोप १८

रिएकद्वित्रिपंचाष्टस्वंकेपंचकंयथाप्रस्तारसंख्यंयथाक्रममुत्तरोत्तरंस्थाप्यं।एवंचयत्रादौल
घुस्ततोगुरुद्वयमीदृशःपंचकलस्यकतमोभेदइतिपृष्टेएकद्वित्रिपंचाष्टस्वंकपंचकेयथोक्तस्था
रोत्त नेयथाक्रममुत्तरं संस्थापितेगुरुशिरस्थद्वितीयपंचमेस्वंकद्वयेकाक्रियानिःपन्नसप्तमांकबो
धितसंख्यायाःसर्वांतिमाष्टमांकबोधितसंख्यामध्येलोपेउर्वरितारकलसंख्याएवंचायंप्र
थमोभेदइतिवाच्यं।एवंयत्रप्रथमंगुरुलघूततोगुरुरीदृशोभेदःपंचकलस्यकतमइतिपृष्टेएक रु
द्वित्रिपंचाष्टस्वंकपंचकेयथास्थानंयथाक्रममुत्तरोत्तरंस्थापितेगुरुशिरःस्थैकपंचमेस्वंक
द्वयमेलननलब्धषष्ठसंख्यायाअष्टमसंख्यामध्येलोपेउर्वरिताद्विलसंख्यातथाचायंद्वितीयो
भेदइतिवाच्यं।एवंयत्रलघुत्रयांतेगुरुरीदृशोभेदःकतमइतिपृष्टेपूर्वोक्तेअंकपंचकेतथैवस्था
पितेगुरुशिरःस्थपंचमांकबोधितसंख्यायाःसर्वांतिमाष्टमांकबोधिताष्टमसंख्यामध्येलो

पिं०ग०गु०टी पेउर्वरितात्रित्वसंख्यातथाचायंतृतीयोभेदइतिवाच्यं। एवमग्रेपिगुरुशिरोंकसंख्यामष्टमसंख्या
१९ यांतुस्वोर्वरितसंख्यातत्तद्भेदेवाच्या॥ एवंचतुःकलेद्विगुरुःकतमोभेदइतिवाच्यंएवंपृष्टेएक
द्वित्रिपंचेत्यंकचतुष्टयेयथोक्तस्थानेयथाक्रममुत्तरोत्तरंस्थापितेगुरुशिरःस्थैएकतृतीयेत्यंक
19 द्वयबोधितचतुर्थसंख्यायाःसर्वांतिमपंचांकबोधितसंख्यामध्यलोपेउर्वरिताएकत्वसंख्या
तथाचायंप्रथमोभेदइतिवाच्यं॥ एवंचतुःकलेआदौलघुद्वयंततोगुरुःईदृशःकतमोभेदइ-
तिपृष्टेउक्तरीत्योक्तांकेस्थापितेगुरुशिरःस्थतृतीयांकबोधितत्रित्वसंख्यायाःसर्वांतिमपंच
मांकबोधितसंख्यामध्यलोपेउर्वरिताद्वित्वसंख्यातथाचायंद्वितीयोभेदइतिवाच्यं॥ एवंत्रि
कलेएकद्वित्रीतित्र्यंकत्रयेद्विकलेएकद्वीत्यंकद्वयंसंस्थाप्यवाच्यम्॥३९॥ अमुकेवर्णप्रस्तारेमा राम०
त्राप्रस्तारेवाअमुकोभेदःकीदृशइतिनिर्द्धारितेप्रथमत्वद्वितीयत्वादिधर्मेअनिर्द्धारितस्व १९

रूपभेदे एष्टे इति स्वरूपनिर्द्धारणं नष्टपदवाच्यं तत्र गणेषु अनिर्द्धारितस्वरूपस्य तद्भेदस्य स्व
रूपनिर्धारणप्रकारमाह। नष्टे इति। आद्यौ सर्वकला सर्वाः कलाः यस्य कलगणभेदस्य स्वरूपनि
र्द्धारणं चिकीर्षितं तस्य सर्वाः कला इत्यर्थः पृथक् पृथगिति शेषः कारिज्जमुकुरुष॥ ततः ता
सामुपरीति शेषः। पूर्वज अलमरिअंका। पूर्वोक्तयुगलासदृशांकान्यथादिष्टे इत्यर्थः दि
ज्ज समुद्दहि स्थापयेति यावत्। ततः पृष्ठल अंक अनिर्द्धारितस्वरूपो भेदः पृष्टः तस्य अंकं तत्सं
ख्यानिर्द्धारकांकं तद्बोधितसंख्यामिति यावत् सेषा सर्वांतिमेंके तद्बोधितसंख्यायामिति या सा
वत् मेदा वहु लोपय हीनतानयेति यावत्। ततः लोप्पि कइ लुस्सा उवरल उवरि तिज्जत्थ जत्थय ॥४०॥
त्र यत्र अंके अंके अंत क्रमेण यद्यन्मात्रोपरिस्थितांकस्येति शेषः अंतक्रमेण सर्वांतिमंका
व्यवहितपूर्वांकमारभ्येत्यर्थः। भागभागः लोपः हीनतेति यावत् पाविज्ज इ प्राप्यते संभव

पिंग॰ गु॰ टी॰ तीतियावता। सा सा कलेति शेषः परमत्तापरां मात्रां साव्यवहितोत्तरकलामित्यर्थः॥ लेइ गहि
२० ल्वात यासहेत्यर्थः गुरुता जाइ गुरुतां याति एवं प्रकारेणेति शेषः जत या न भेदा· नित्यर्थः। ले
क्खसिज्ञा तु इछु सित त ता न आइ आगत्य गुरुसमीपमिति शेषः लेक्खहि जानीहि इति पिं
स्पष्टं गलनागः फुरसयकरु इ कथयति एवं प्रकारेण मात्राणामिति शेषः। नट्ठेन ष्टं अनिद्धारितस्व
एकु रूपस्य स्वरूपनिद्धारणमिति यावत् लेखं जानीहि इति योजना अयमर्थः षट्कले प्रथमो भेदः
कीदृश इति दृष्टे षट्कलाः पृथक् पृथक् षट्कलरूपाः स्थाप्याः तासामुपरि यथाप्रस्तारसंख्यं
एकद्वित्रिपंचाष्टत्रयोदशेति षडंकान् क्रमेणोत्तरोत्तरं संस्थाप्य दृष्टे प्रथमांके शेषे त्रयो
दशांकमध्ये हीने कृते सति उर्वरित द्वादशांकमध्ये अंतक्रमेण गुरूपदेशात् शेष त्रयोदशाव्य राम॰
वहित एवं पंचममात्रोपरिस्थाष्टांकलोपे पंचमषष्ठमात्राभ्यामेको गुरुः संपद्यते। ततः उ २०

वरिते चतुर्थांके पंचमांकलोपासंभवात्तृतीयमात्रोपरिस्थतृतीयांकलोपे तृतीयचतुर्थमा
त्राभ्यामेको गुरुः कल्पनीयः ततउर्वरितेकांकमध्ये द्वितीयांकलोपासंभवात्प्रथममात्रोपरि
स्थेकांकलोपे प्रथमद्वितीयमात्राभ्यामेको गुरुः कल्पनीयः एवंत्रिगुरुः ऽऽऽ षट्कलस्यप्रथमो
भेद इतिवाच्यं ॥ एवं षट्कलस्य द्वितीयो भेदः कीदृश इति पृष्टे त्रयोदशांकमध्ये पृष्टद्वितीयां
कलोपे उर्वरितेकादशांकमध्ये पंचमकलास्थाष्टांकलोपे सति पंचषष्ठमात्राभ्यामेको गुरुः क म
त ल्पनीयः। ततउर्वरिते तृतीयांकमध्ये तृतीयांकलोपे तृतीयचतुर्थकलाभ्यामेको गुरुः कल्प
नीयः ततश्चांकाभावान्नभागकल्पना एवं सति आदौ लघुद्वयं ततो गुरुद्वयं यत्र एतादृशः संष
ट्कलस्य द्वितीयो भेद इति वाच्यं ॥ एवं षट्कलस्य तृतीयो भेदः कीदृश इति पृष्टे त्रयोदशांकमध्ये
पृष्टतृतीयांकलोपे सत्युर्वरितदशांकमध्ये पंचममात्रास्थाष्टांकलोपे पंचमषष्ठमात्राभ्यामे

कोगुरुः कल्पनीयः उर्वरिते द्वितीयांके तृतीयपंचमांकलोपासंभवात् द्वितीयमात्रास्य द्वितीयांक
लोपे द्वितीयतृतीयमात्राभ्यामेको गुरुः कल्पनीयः ततश्चांकाभावान्नभागकल्पना एवं सति य
त्र प्रथमं एको लघुस्ततो गुरुर्लघू ततएको गुरुरेतादृशः षट्कलस्य तृतीयो भेद इति वाच्यं ए
वमग्रेप्यूह्यं अथ पंचकलस्य प्रथमो भेदः कीदृश इति दृष्टे पंचकला पृथक् पृथक् लघुरूपेण वि
न्यस्य तासामुपरि पूर्वोक्तरीत्या यथाप्रस्तारसंख्यमेकद्वित्रिपंचाष्टेत्यंकपंचकं विन्यस्य दृष्टे
प्रथमांके शेषे ऽष्टांके लुप्ते उर्वरितसप्तमांकमध्ये गुरूपदेशाच्चतुर्थकलायाः पंचमांकलोपे स
ति चतुर्थपंचमकलाभ्यामेको गुरुः कल्पनीयः ततः उर्वरितद्वितीयांकमध्ये तृतीयांकलो
पासंभवात् द्वितीयमात्रास्था द्वितीयांकलोपे द्वितीयतृतीयमात्राभ्यामेको गुरुः कल्पनीयः तत
श्चांकाभावान्नकल्पना एवं च यत्रादौ लघुस्ततो गुरुद्वयमेतादृशः पंचकलस्य प्रथमो भेदः

इतिवाच्यं।एवंपंचकलस्यद्वितीयोभेदःकीदृशइतिपृष्टेशेषाष्टांकमध्येपृष्टद्वितीयांकंलुप्त्वोर्व
रितषष्ठांकमध्येचतुर्थमात्रास्यपंचमांकलोपेचतुर्थपंचममात्राभ्यामेकोगुरुःकल्पनीयःत
तश्चोर्वरितैकांकमध्येतृतीयद्वितीयांकलोपात्संभवात्प्रथममात्रास्थैकांकंलुप्त्वाप्रथमद्विती
यमात्राभ्यामेकोगुरुःकल्पनीयःततश्चमात्रांकयोरभावान्नकल्पनाएवंचादौगुरुस्ततोलघुर्गु
रुःएवंभूतःपंचकलस्यद्वितीयोभेदइतिवाच्यं।एवंतृतीयादिसप्तमांताभेदानुहनीयाः।एवंपंच
कलस्याष्टमोभेदःकीदृशइतिपृष्टेपृष्टांकस्याष्टमस्यपंचमकलास्थशेषेऽष्टमांकेलोपात्परमा
त्राभावान्नगुरुत्वंएवंचपंचलघुःपंचकलस्याष्टमोभेदइतिवाच्यं।एवंचतुःकलस्यप्रथमोभेद
ःकीदृशइतिपृष्टेचतस्रोमात्राःपृथक्विन्यस्यतासामुपरियथाप्रस्तारसंख्यमेकद्वित्रिपंचेत्यं
कचतुष्टयंविन्यस्यपृष्टप्रथमांकंशेषपंचमांकमध्येलुप्त्वोर्वरितचतुर्थांकमध्येचतुर्थमात्रा

पिग०गु०टी० स्यत्तृतीयांकलोपे चतुर्थपंचममात्राभ्यामेको गुरुः कल्पनीयः ततउर्वरितैकांकमध्ये द्वितीयां
२२ कलोपासंभवात्प्रथममात्रास्थमेकांकं लुप्त्वा प्रथमद्वितीयमात्राभ्यामेको गुरुः कल्पनीयः ए
वं चतुःकलस्य द्विगुरुः प्रथमो भेद इति वाच्यं। एवं चतुःकलस्य द्वितीयो भेदः कीदृश इति पृष्टे द्वि
तीयांकं शेषपंचमांकमध्ये लुप्त्वोर्वरिततृतीयमात्रास्थतृतीयांकलोपे तृतीयचतुर्थमात्राभ्या
मेको गुरुः कल्पनीयः ततश्चांकाभावान्न कल्पना। एवं पंचद्विलघूत्तरमेको गुरुः स चतुःकलस्य द्वि
तीयो भेदः एवमग्रेप्यूह्यं॥ एवं त्रिकलस्य प्रथमो भेदः कीदृश इति पृष्टे लघुत्रयं विन्यस्य तत्र प्र
त्येकं यथाक्रमं एकद्वित्रि इत्येतदंकत्रयं दत्वा पृष्टप्रथमांकं शेषतृतीयांकमध्ये लुप्त्वोर्वरितद्वि
तीयांकमध्ये द्वितीयमात्रास्थद्वितीयांकलोपे द्वितीयतृतीयमात्राभ्यामेको गुरुः कल्पनीयः त एम०
तश्चोर्वरितांकाभावान्न कल्पना। ततश्चात्र क्रमेण लघुगुरू स त्रिकलस्य प्रथमो भेद इति वा २२

वाच्यं। एवं त्रिकलद्वितीयो भेदः कीदृश इति पृष्टे द्वितीयां कं शेषत्तृतीयां कमध्ये लुप्त्वा उर्वरित ए
कोंकस्तत्र प्रथमकलास्थैकांकलोपे प्रथमद्वितीयकलाभ्यामेको गुरुः कल्पनीयः ततश्चोर्वरितांका
भावान्नकल्पना एवं चयत्र क्रमेण गुरुलघ्समत्रिकलस्य द्वितीयो भेद इति वाच्यं। एवं द्विकलस्य
प्रथमो भेदः कीदृश इति पृष्टे लघुद्वयं विन्यस्य तत्र एकद्वितीये स्यं कद्वयं दत्वा पृष्टे कांकं शेष द्वितीयां
कमध्ये लुप्त्वोर्वरितैकांकमध्ये प्रथमकलास्थैकांकलोपे प्रथमद्वितीयकलाभ्यामेको गुरुः कल्प
नीयः ततश्चोर्वरितांकाभावान्नकल्पना एवं एकगुर्वात्मको द्विकलस्य प्रथमो भेद इति वाच्यं॥ ए
वं समकलादिष्वपि बोध्यं॥ ४१॥ अथ वर्णवृत्तभेदोद्दिष्टप्रकारमाह॥ अक्षरेति। अक्षर उप
र्यक्षरोपरि अत्राक्षरपदस्य प्रथमाक्षरपरत्वात्प्रथमोक्षरोपरीत्यर्थः एकं अंकं द्वितीयाद्यक्ष
रोपरि चेति शेषः दुस्मा अंका द्विगुणानेकान् दिज्ज सु देहि आद्यक्षरोपरि एकोंऽको देयः ततो द्वि

पिंग॰गु॰टी तीयाद्यक्षरोपरि सर्वे सर्वोपेक्षया द्विगुणात्र्यंकाः उत्तरोत्तरं यथाप्रस्तारसंख्यं देयाः यथा एकद्वि
२३ चतुरष्टषोडशेत्यादय इति निर्गलितार्थः एवं कृते सतीति शेषः लहु उप्परि लघूपरि जो अंको २
यः अंकः तं अंकं एक्केण एकेन। एकत्वसंख्याबोधकेनांकेनेत्यर्थः देइ दत्वा संयोज्येति यावत् वर्ण
23 वृत्तभेदानामिति शेषः उद्दिट्ठं उद्दिष्टं प्रथमत्वद्वितीयत्वादिधर्मावधारणमिति यावत् जाणेहु
जानीहीत्यर्थः लघूपरिस्थांकेन एकेन योजिते योंकः संपद्यते तेन प्रथमत्वद्वितीयत्वादिधर्मा
वधारणं कार्यमिति निर्गलितार्थः ज्ञात्वा चेति शेषः मुणह मनन कुरु पुनः पुनश्चेतसि भावयेति
यावत्। वर्णवृत्तेषु प्रथमभेदे लघोरभावात् द्वितीयादिभेदमारभ्योद्दिष्टप्रवृत्तिर्बोध्येति विभा
वनीयं। अयमर्थः एकलघ्वात्मक एकाक्षरवृत्तस्य कतमो भेद इति पृष्टे लघुं विन्यस्य तत्रस्थमे राम॰
कमंकमेकेनांकेन संयोज्य द्वितीयोऽयं भेद इति वाच्यं। एवं यत्र द्व्यक्षरवृत्तभेदे क्रमेण लघुगु २३

रू भवतः स भेदः कतम इति पृष्टे लघोरुपरि एकं गुरोरुपरि च द्वितीयमंकं विन्यस्य लघूपरिस्थे
कांके एकांकेन योजिते द्वितीयोंकः संपद्यते। एवं चायं द्वितीयो भेद इति वाच्यं। एवं यत्र क्रमेण गुरु
लघू भवतः स भेदः कतम इति पृष्टे गुरोरुपर्येकमंकं लघोरुपरि द्वितीयं विन्यस्य लघूपरिस्थे द्विती
यांके एकेनांकेन योजिते तृतीयोंकः संपद्यते एवं चायं तृतीयो भेद इति वाच्यं। एवं यत्र लघुद्वयं स
द्व्यक्षरवृत्तस्य कतमो भेद इति पृष्टे प्रथमलघोरुपर्येकं द्वितीयलघोरुपरि द्वितीयमंकं विन्यस्य एत
यायोर्जनेन संपन्ने तृतीयांके एकेन योजिते चतुर्थोंकः संपद्यते एवं चायं चतुर्थो भेद इति वाच्यं
॥ एवं त्र्यक्षरवृत्ते यत्र प्रथममेको लघुस्ततो गुरुद्वयं देयं ईदृशः कतमो भेद इति पृष्टे क्रमेणैकद्विच
तुरित्यंकत्रयं दत्वा लघूपरिस्थे एकेन योजिते द्वितीयोंकः संपद्यते तेन द्वितीय ईदृशो भेद इति वा
च्यं एवं यत्र प्रथमं गुरुस्ततो लघुगुरू ईदृशः त्र्यक्षरवृत्तस्य कतमो भेद इति पृष्टे क्रमेणैकद्विच

पिं॰ग॰गु॰टी तुरिस्यंकत्रयं दत्वा लघुपरिस्थे द्वितीयांके एकांकेन योजिते जातेन तृतीयांकेन तृतीय ईदृशो भेद इ
२४ ति वाच्यं। एवं त्र्यक्षरवृत्ते यत्र प्रथमं लघुद्वयं ततो गुरुरीदृशः कतमो भेद इति एष्टे पूर्वोक्तानंकान्यथा
क्रमं विन्यस्य लघुपरिस्थे कद्वये त्र्यंकद्वयेन एकेन योजिते निःपन्नेन चतुर्थेन चतुर्थोयं भेद इति वा
च्यं। एवमन्येप्यूह्यं। एवं चतुरक्षरवृत्ते यत्र प्रथममेको लघुस्ततो गुरुत्रयं भवति ईदृशो भेदः कतम
इति एष्टे तत्र क्रमेणोत्तरोत्तरं एकद्विचतुरष्टेत्यंकचतुष्टयं दत्वा लघुपरिस्थे एकांके एकांकेन यो
जिते जातेन द्वितीयांकेन द्वितीयो भेदः ईदृश इति वाच्यं। एवं चतुरक्षरवृत्ते यत्रादौ गुरुर्लघुस्त
तो गुरुद्वयमीदृशो भेदः चतुर्वर्णवृत्तस्य कतम इति एष्टे पूर्वोक्तमंकचतुष्टयं तत्र यथास्थानं
निवेश्य लघुपरिस्थे द्वितीयांके एकेन योजिते जातेन तृतीयांकेन तृतीय ईदृशो भेद इति वाच्य एम॰
एवं चतुर्वर्णवृत्ते यत्रादौ लघुद्वयं ततो गुरुद्वयं पतति ईदृशो भेदः कतम इति एष्टे पूर्वोक्तमंक २४

चतुष्टयंयथास्थानंनिवेश्यलघुपरिस्थैकद्वयेस्यंकद्वयेनयोजितेजातेनचतुर्थांकेनचतुर्थोभेद
ईदृशइतिवाच्यं।एवंयत्रादौगुरुद्वयंततोलघुगुरूईदृशोभेदश्चतुर्वर्णवृत्तस्यकतमइतिपृष्टेपू
र्वोक्तमंकचतुष्टयंयथास्थानंनिवेश्यलघुपरिस्थचतुर्थेकेएकेनयोजितेजातेनपंचमांकेनपं
चमोयंभेदइतिवाच्यं।एवमग्रेप्यूह्यं।एवंपंचाक्षरादावपिवाच्यं॥अथवर्णवृत्तभेदेषुनष्टप्रकारमा ॥४२॥
ह॥नष्टेइति॥अंकेसमेविषमेवेत्यर्थः भाग्यं।भागमर्द्धांशमितियावत्यथाप्रस्तारसंख्यमितिशेषः
करिज्जसुकुरुष्वकल्पयेतियावत्तत्रयःसमभागोहसमभागःसमस्यभागःअर्द्धांशः इत्यर्थः।
तदृततः लहुअलघुंमणिज्जसुजानीहिकलयेतियावत्विसमविषमस्यांशस्यएक्कंदइएकंए
कत्वसंख्याबोधकमंकमित्यर्थः देइदत्वासंयोज्येतियावत्।वंटणवंटनभागमर्द्धांशमितिया
वत्किज्जसुकुरुष्वकल्पयेतियावत्वंटनमितिभागकल्पनेदृशीततःगुरुआणिज्जसुगुरुंआ

नयकल्पयेतियावत्एवंप्रकारेणवर्णवृत्तभेदानामितिशेषः णट्ठेनष्टंनष्टप्रकारमितियावत्पिंग
लजंपइपिंगलोजल्पतिकथयतिसमांकभागेकृतेयोंकःसलघुकल्पकः विषमांकभागेयोंकःस
गुरुकल्पकः विषमांकस्यभागस्तुविषमांकमेकेनांकेनसंयोज्यकल्पनीयः इतिनिर्गलितार्थः अ
त्रयद्यपिएकांकेनयोजितोविषमः सममभावंप्राप्नोतितथापितस्यभागः विषमांकभागएवेतित
तोलघुकल्पनभ्रांतिर्नकर्त्तव्येतिध्येयं॥ अयमर्थः एकाक्षरवृत्तस्यप्रथमोभेदः कीदृशइतिपृष्टेए
कांकेविषमेएकांकयोजनेनकृतभागेएकोगुरुः कल्प्यः अनंतरंचाक्षराभावान्नकल्पना॥ एवंचए
काक्षरवृत्तस्यप्रथमोभेदएकगुरुरितिवाच्यं॥ एवंएकाक्षरवृत्तस्यद्वितीयोभेदः कीदृशइतिपृष्टेए
ष्टद्वितीयांकस्यसमत्वातएकोलघुः कल्पनीयः अनंतरंचाक्षराभावान्नकल्पना एकलघुर्द्वि राम०
तीयोभेदइतिवाच्यं॥ एवंद्व्यक्षरवृत्तस्यप्रथमोभेदः कीदृशइतिपृष्टेपृष्टस्यएकांकस्यविषम २५

स्य एकांकयोजनेन भागे एको गुरुः कल्पनीयः पुनरपि भागलब्धस्यैकांकस्य विषमस्य भागे
द्वितीयो गुरुः कल्प्यः अनंतरं चाक्षराभावान्नकल्पना एवं च द्विगुरुर्द्व्यक्षरवृत्तस्य प्रथमो भेद इ
ति वाच्यं ॥ एवं द्वितीयो भेदः कीदृश इति पृष्टे द्वितीयांकस्य समस्य भागे एको लघुः कल्पनीय
स्ततो भागलब्धस्यैकांकस्य विषमत्वादेकेन योजितस्य भागे एको गुरुः कल्प्यः अनंतरं चाक्षरा
भावान्नकल्पना । एवं च प्रथमो लघुस्ततएको गुरुरीदृशो द्व्यक्षरवृत्तस्य द्वितीयो भेदः एवं छ
द्व्यक्षरवृत्तस्य तृतीयो भेदः कीदृश इति पृष्टे ३ त्र्यंकस्य तृतीयस्य विषमत्वात् एकांकयोजने
न भागे प्रथममेको [redacted] गुरुः कल्पनीयस्ततो भागलब्धस्य द्वितीयांकस्य समत्वात् भागे एको लघुः
कल्प्यः अनंतरं चाक्षराभावान्नकल्पना । एवं च यथाक्रमेण गुरुलघू भवतः ईदृशो द्व्यक्षरवृत्तस्य तृ त्र
तीयो भेद इति वाच्यं । एवं चतुर्थो भेदः कीदृश इति पृष्टे ४ अंकस्य चतुर्थस्य समत्वात् भागे प्रथमम ए २७

कोलघुः कल्प्यः ततः भागलब्धस्य द्वितीयांकस्यापि समत्वात्तद्भागेपि पुनरेष्येकोलघुः कल्प्यः अ
नंतरं चाक्षराभावान्नकल्पना। एवं च यत्र लघुद्वयं सत्र्यक्षरवृत्तस्य चतुर्थो भेद इति वाच्यं। एवं
त्र्यक्षरस्य प्रथमो भेदः कीदृश इति पृष्टे पृष्टांकस्यैकस्य विषमत्वात् एकांकेनयोजितस्य भा
गे एको गुरुः प्रथमं कल्प्यः ततो भागलब्धस्यैकांकस्य विषमत्वादेकांकयोजनाद्वारद्वयं भागे गु
रुद्वयकल्पनं अनंतरं चाक्षराभावान्न कल्पना। एवं च यत्र गुरुत्रयं मीदृशः त्र्यक्षरवृत्तस्य प्रथ
मो भेद इति वाच्यं। एवं त्र्यक्षरस्य द्वितीयो भेदः कीदृश इति पृष्टे पृष्टांकस्य द्वितीयस्य समत्वाद्भा
गे प्रथमे मेकोलघुः कल्प्यस्ततो भागलब्धस्यैकांकस्य विषमत्वात् एकांकयोजनाद्वारद्वयं भा
गे गुरुद्वयं कल्पनीयं अनंतरं चाक्षराभावान्न कल्पना। एवं प्रथममेकोलघुस्ततो गुरुद्वयमीदृ
शस्त्र्यक्षरस्य द्वितीयो भेद इति वाच्यं एवं त्र्यक्षरस्य तृतीयो भेदः कीदृश इति पृष्टे पृष्टांकस्य तृती

यस्यविषमत्वादेकांकयोगेनभागकल्पनेएकोगुरुः कल्प्यस्ततोभागलब्धस्यद्वितीयांकस्यसम
त्वात्तन्म्द्भागेलघुः कल्प्यस्ततोभागलब्धस्यएकांकस्यविषमत्वादेकांकयोगेनतन्म्द्भागेगुरुःकल्प्य
ः अनंतरंचाक्षराभावान्नकल्पनाएवंचयत्रप्रथममेकोगुरुस्ततोलघुगुरूईदृशस्त्र्यक्षरस्य
तृतीयोभेदइतिवाच्यंएवंत्र्यक्षरवृत्तस्यचतुर्थोभेदः कीदृशइतिपृष्टेपृष्टस्यचतुर्थांकस्यसम
मत्वात्तन्म्द्भागेएकोलघुः कल्प्यस्ततोभागलब्धस्यद्वितीयांकस्यापिसमत्वात्तन्म्द्भागेपिलघुः
कल्पनीयः ततोभागलब्धस्यैकांकस्यविषमत्वादेकांकयोगेनतन्म्द्भागेगुरुःकल्पनीयस्तत
श्चाक्षराभावान्नकल्पना। एवंचयत्रप्रथमंलघुद्वयंततएकोगुरुरीदृशस्त्र्यक्षरवृत्तस्यच
तुर्थोभेदः इतिवाच्यंएवमग्रेप्यूह्यंएवंचतुरक्षरस्यप्रथमोभेदः कीदृशइतिपृष्टेपृष्टेशंकस्यैकस्य
विषमत्वादेकदत्वात्तन्म्द्भागेएकोगुरुःकल्पनीयः ततोभागलब्धस्यैकांकस्यवारत्रयमेकांकयो

जनेनभागेगुरुत्रयंकल्पयित्वाचतुर्गुरुस्चतुरक्षरप्रथमोभेदइतिवाच्यंएवंचतुरक्षरस्यद्वितीयो
भेदःकीदृशइतिपृष्टेपृष्टस्यद्वितीयांकस्यसमत्वात्तन्द्भागेएकोलघुःकल्पनीयस्ततोभागलब्ध
स्यैकस्यविषमत्वादेकांकंदत्वावारत्रयंभागकल्पनेगुरुत्रयंकल्पनीयंएवंचयत्रादौलघुस्ततो
गुरुत्रयमीदृशश्चतुरक्षरस्यद्वितीयोभेदइतिवाच्यंएवमन्यत्रापूह्यं॥४३॥अमुकवर्णवृत्तमात्रा
गणप्रस्तारयोरेतावद्गुरुलघुकोभेदःकतिसंख्याकइतिअनिर्दिष्टक्रमस्यितिनिर्द्धारितसं
ख्याकगुरुलघुयुक्तत्वरूपप्रस्तारनिर्णीतस्वरूपानिर्द्धारितसंख्याकभेदनिष्ठायाःएकोद्वा
वित्यादिपिंडीभूतैकत्वद्वित्वादिकायाःनिखिलवर्णवृत्तमात्रागणभेदनिष्ठायाश्चपिंडीभूत
द्वित्वचतुष्ट्वाष्टषोडशेत्यादिकायाःसंख्यायानिर्द्धारणंनिर्द्धारककोष्ठस्याङ्कसमूहोवामेरुः
अत्रनिखिलभेदनिष्ठपिंडीभूतद्वित्वचतुष्ट्वादिसंख्यानिर्द्धारणंतत्तन्मेरुपंक्तिनिखिलकोष्ठ

वर्त्स्यैकयोजननिष्पन्नांकेन बोध्यमिति गुरूपदेशोऽनुसंधेयः। पूर्ववद्धि विधेतत्र वर्णमेरुप्र
सं कारमाह। अक्खरसंखेति। अक्खरसंखे संख्याताक्षराणां अत्राक्षरपदस्य चरणाक्षरपरत्वात्सं
ख्यातचरणाक्षराणामित्यर्थः संख्यातानिराकादिषड्विंशतिपर्यंतसंख्यायुक्तानि चरणाक्ष
राणि येषां तेषां वृत्तानामिति निर्गलितार्थः कोठुकोष्ठानि गुरूपदेशादिति शेषः करुकुरुए
काक्षरचरणवृत्तस्य कोष्ठद्वयं द्व्यक्षरचरणवृत्तस्य कोष्ठत्रयं त्र्यक्षरचरणवृत्तस्य कोष्ठचतुष्ट
यं चतुरक्षरचरणवृत्तस्य कोष्ठपंचकमित्येवं गुरूपदेशात् उत्तरोत्तरैकवृद्ध्या एकाक्षरमार
भ्य षड्विंशत्यक्षरपर्यंतं कोष्ठानि कल्पयेति निर्गलितार्थः तेषु आइ अंत आद्यंतयोः कोष्ठयो
ः पठमंकं प्रथममंकं एकत्वसंख्याबोधकमंकमिति यावत् देहीति शेषः अवरं अपरं आद्यंतां
तरालस्थितमिति यावत् कोष्ठकं सिरहुइ अंके शिरोंकद्वयेन अवहट्ठभाषायां सर्वं निपातानि

पिंगशु·टी॰ यमात्तंभरूपरयपूरणीयकोष्ठशिरःस्थांकद्वययोजननिष्पन्नांकेनोद्यंतांतरालस्थितंकोष्ठं
२८ पूरणीयमित्यर्थः एवंप्रकारेणेतिशेषः मेरुमेरुःणिसंकनिःशंकनिश्चयेनेतियावत्सइंसू
च्यतेनिर्मीयतेइतियोजनाथतन्निर्माणप्रकारोलिख्यतेप्रथमंवामदक्षिणयोरेकांगुल
त मायममूर्ध्वाधोरेखाद्वयंविनिर्मायतत्पार्श्वयोःऋजुरेखयामेलनीयंएवंएकंदीर्घकोष्टंविधाय
४ तत्रऊर्ध्वरेखामध्यदेशात्माराभ्याधोरेखामध्यदेशपर्यंतमेकाऋजुरेखांदत्वाकोष्टद्वयंकल्प
नीयंतत्रप्रत्येकमेकैकांकोदेयः १ । १ । २ तत्रप्रथमंइदंमेरुस्वरूपंप्रथमकोष्टस्यैकांकेनए
कवर्णवृत्तेएकगुरुरेकोभेदः द्वितीयको[illegible]ष्टस्यैकांकेनचएकलघुरेकोभेदः इतिनिर्द्धारितेक
त्वसंख्याकगुरुलघुयत्नात्वरूपनिर्णीतस्वरूपेकवर्णभेदनिष्टेकत्वसंख्याप्रतीयतेकोष्टद्व राम॰
यस्यैकांकद्वयपरस्परयोजननिःपन्नद्वितीयांकेनचैकवर्णवृत्तभेदस्यद्वित्वरूपासमस्तासं २९

ख्या प्रतीयते इतीयं कोष्ठद्वयात्मिका प्रथमा एकवर्णमेरुपंक्तिः एवं एतस्यं त्यधोरेखां पार्श्वयो
र्मनागवर्द्धयित्वा अंगुष्ठमात्रमध्यदेशं त्यक्त्वा अधस्तादेकां रेखां उपरितनरेखासमानां कार्या
वृ पार्श्वयोश्च वक्ररेखाद्वयामेलनं कार्यं एवमेकमायतं कोष्ठं विधाय तत्र उपरितनप्रथमकोष्ठस्या
धोरेखामध्यदेशमारभ्याधस्तनरेखापर्यंतमेकामृजुरेखां देया ततः द्वितीयकोष्ठाधोरेखाम
ध्यमारभ्याधस्तनरेखापर्यंतमेकामृजुरेखां देया एवं कोष्ठत्रयं संपाद्य प्रथमास्य कोष्ठयोः प्र
त्येकमेकैकांको देयः अंतरालवर्तिचिद्वितीयः कोष्ठः शिरस्थैकांकद्वययोजननिष्पन्नद्वि
तीयांकेन पूरणीयः तत्र द्व्यक्षरवृत्तभेदेषु द्विगुरुरेको भेद इति निर्द्धारितद्विव
संख्याकगुरुयुक्तद्व ४ क्षरवृत्तनिष्ठैकत्वरूपसंख्या प्रथमकोष्ठस्थैकांकेन प्र
तीयते ततो द्वितीय कोष्ठस्थद्वितीयांकेन द्व्यक्षरस्यैकगुर्वेकलघुयुक्तौ द्वौ भेदा

	१	१
१	२	१

पिं॰ग॰गु॰टी विति निर्द्धारिते कत्वसंख्याक गुरुलघुयुक्ताक्षरभेदनिष्ठद्वित्वरूपसंख्या प्रतीयते ततस्तृतीय
२९ कोष्ठस्थैकांकेन ग्रक्षरस्य द्विलघुरेको भेद इति निर्द्धारिते द्वित्वसंख्याक लघुयुक्ताक्षरभेदनिष्ठैक
त्वरूपसंख्या प्रतीयते कोष्ठत्रयस्थसमस्तांकयोजननिष्पन्नचतुर्थांकेन च चतुष्टुरूपा समस्त
भेदसंख्या निश्चीयते सेयं कोष्ठत्रयसंख्याक्षरमेरुपंक्तिर्द्वितीया एवं एतस्य त्र्यधोरेखां पार्श्वयो
र्मनाग्वर्द्धयित्वांगुलमात्रामध्यदेशेऽस्योपरितनरेखासमानाधस्ताद्रेखा कार्या पार्श्वयोश्च
ऋजुरेखयामेलनं कार्यमेवमेकं दीर्घकोष्ठं निर्मीयते तत्र उपरितनप्रथमकोष्ठाधोरेखामध्य देश
मारभ्याधोरेखापर्यंतमेका ऋजुरेखा देया ततो द्वितीयकोष्ठाधोरेखामध्यदेशमारभ्याधोरेखाप
र्यंतमेका ऋजुरेखा देया ततो द्वितीयकोष्ठाधोरेखामध्यमारभ्याधोरेखापर्यंतमेका ऋजुरेखा दे रम॰
याततस्तृतीयकोष्ठाधोरेखामध्यमारभ्याधोरेखापर्यंतमेका ऋजुरेखा देया एवं कोष्ठचतुष्टयं २९

संपाद्यतत्राद्यंतकोष्टयोः प्रत्येकमेकैकोंकोदेयस्तदंतरालस्थद्वितीयकोष्टस्य च ताच्छिरस्थैक
द्वितीयेस्थंकद्वययोजननिःपन्नत्रतीयांकेन पूरणं कार्यं त्रतीयकोष्टस्य च तच्छिरस्थद्वितीयैक
स्थंकद्वययोजननिष्पन्नत्रतीयांकेन पूरणं कार्यं। तत्र प्रथमकोष्टस्थैकांकेन

	१	२	१
१	३	३	१

त्र्यक्षरस्यैद्विगुर्वैकलघुयुक्तभेदत्रयमिति निर्द्धारि ८ तद्वितैकत्वसंख्याकगुरु
लघुयुक्तत्र्यक्षरभेदनिष्टत्रित्वरूपसंख्यानिश्चीयते एवं त्रतीयकोष्टस्थत्रतीयांकेन त्र्यक्षरस्यै
कगुरुद्विलघुयुक्तभेदत्रयमिति निर्द्धारितैकत्वद्वित्वसंख्याकं लघु + त्रिगुरुरेको भेद इति निर्द्धा
रितत्रित्वसंख्याकगुरुयुक्तत्र्यक्षरवृत्तभेदनिष्टैकत्वरूपसंख्याप्रतीयते द्वितीयकोष्टस्थत्रती
यांकेन च त्र्यक्षरस्य + युक्तत्र्यक्षरभेदनिष्टैकत्वरूपसंख्या प्रतीयते कोष्टचतुष्टस्य सर्वांकयो य
जननिष्पन्नाष्टमांकेन च त्र्यक्षरस्याष्टौ भेदा इति समस्तत्र्यक्षरवृत्तभेदसंख्या निश्चीयते सोऽयं
४ गुरुलघुयुक्तत्र्यक्षरभेदनिष्ठत्रित्वरूपसंख्यानिश्चीयते· एवं चतुर्थकोष्ठस्थैकांकेन त्र्यक्षरस्यात्रिलघुयुक्त एको भेद इति नि- र्धारितत्रित्वसंख्याक ४

पिं०गा०गु०टी० तृतीयाकोष्ठचतुष्टययुक्तात्तृतीयाक्षरमेरुपंक्तिः॥ एवं पूर्वोक्तरीत्यैकं दीर्घकोष्ठं निर्माय तत्रको
३० ष्ठपंचकं विधाय प्रथमांत्ययोः कोष्ठयोरेकैकांकोदेयः अंतरालस्थस्य द्वितीयकोष्ठस्य शिर
स्थैकात्तृतीयेत्यंकद्वययोजननिष्पन्नचतुर्थांकेन पूरणं विधेयं तृतीयकोष्ठस्य च शिरःस्थात्तृ
30 तीयांकद्वययोजननिष्पन्नषष्ठांकेन पूरणं विधेयं चतुर्थकोष्ठस्य च शिरःस्थात्तृतीयेकेत्र्यंकद्व
ययोजननिष्पन्नचतुर्थांकेन पूरणं विधेयं तत्र प्रथमकोष्ठस्थैकांकेन च
तुरक्षरवृत्तस्य चतुर्गुरुरेको भेद इति निर्द्धा १६ रित चतुष्टुसंख्याकगुरुयु

	१	३	३	१
१	४	६	४	१

क्तचतुरक्षरवृत्तभेदनिष्ठैकत्वसंख्या प्रतीयते। द्वितीयकोष्ठस्य चतुर्थांकेन च चतुरक्षरस्य त्रि
गुर्वैकलघुयुक्तं भेदचतुष्टयमिति निर्द्धारित त्रित्वैकत्वसंख्याकगुरुत्रिलघुयुक्तचतुरक्षरभेद एम०
निष्ठचतुष्टुरूपसंख्या प्रतीयते। ततस्तृतीयकोष्ठस्य षष्ठांकेन चतुरक्षरस्य द्विगुरुद्विलघुयुक्ताः ३०

षड्भेदा इति निर्द्धारितद्वित्वसंख्याकगुरुलघुयुक्तचतुरक्षरभेदनिष्ठषट्त्वसंख्या प्रतीयते। ततश्च
तुर्थकोष्ठस्य चतुर्थांकेनैकगुरुत्रिलघुयुक्तचतुरक्षरस्य भेदचतुष्टयमिति निर्द्धारितैकत्वत्रित्वसं
ख्याकगुरुलघुयुक्तचतुरक्षरभेदनि~~ष्ठकत्वरूपसंख्यानि~~ष्ठचतुष्ट्वसंख्या निश्चीयते। ततः पंचमको
ष्ठस्यैकांकेन चतुर्लघुयुक्तश्चतुरक्षरस्यैको भेद इति निर्द्धारितचतुष्ट्वसंख्याकलघुयुक्तचतुरक्ष
रभेदनिष्ठैकत्वरूपसंख्या निश्चीयते कोष्ठपंचकनिष्ठसर्वांकयोजननिष्पन्नषोडशांकेन च षो
डशरूपा समस्ता चतुरक्षरभेदसंख्या प्रतीयते सेयं पंचकोष्ठयुक्ता चतुर्थी चतुरक्षरमेरुपंक्ति
ः। एवं सर्वोक्तरीत्या एकं दीर्घं कोष्ठं विधाय तत्र कोष्ठषडंकं निर्माय प्रथमान्त्यकोष्ठयोरेकैकांको द
यः अंतरालस्य द्वितीयकोष्ठस्य शिरःस्थैकचतुर्थेत्यंकद्वययोजननिष्पन्नपंचमांकेन पूरणं वि
धेयं। ततस्तृतीयकोष्ठस्य शिरस्थचतुर्थषष्ठेत्यंकद्वययोजननिष्पन्नदशमांकेन पूरणं विधेयं

पिग·गु·टी ततश्चतुर्थकोष्ठस्यशिरःस्थषष्ठचतुर्थेसंकद्वययोजननिष्पन्नदशमांकेनपूरणंविधेयं·ततःपंच
३१ मकोष्ठस्यशिरःस्थचतुर्थेकेत्यंकद्वययोजननिष्पन्नपंचमांकेनपूरणंविधेयं। तत्रप्रथमकोष्ठ

१	४	६	४	१	
१	५	१०	१०	५	१

स्यैकांकेनपंचाक्षरवृत्तस्यपंचगुरुरेकोभेदइतिनिर्द्धारितपंचल
३२ संख्याकगुरुयुक्तपंचाक्षरभेदनिष्टैकलसंख्यानिश्चीयतेत
31
तःद्वितीयकोष्ठस्यपंचमांकेनचपंचाक्षरवृत्तस्यचतुर्गुर्वेकलघुयुक्तभेदपंचकमितिनिर्द्धारि
तचतुष्टैकलसंख्याकगुरुलघुयुक्तपंचाक्षरभेदनिष्टपंचलसंख्यानिश्चीयतेततस्तृतीयकोष्ठ
स्यदशमांकेनपंचाक्षरवृत्तस्यत्रिगुरुद्विलघुयुक्तभेददशकमितिनिर्द्धारितत्रिलद्विलसंख्या
कगुरुलघुयुक्तपंचाक्षरभेदनिष्टदशलसंख्यानिश्चीयतेततश्चतुर्थकोष्ठस्यदशमांकेनपंचा एम०
क्षरवृत्तस्यद्विगुरुत्रिलघुयुक्तभेददशकमितिनिर्द्धारितद्विलत्रिलसंख्याकगुरुलघुयुक्तपंचा ३१

सरभेदनिष्टदशालसंख्यानिश्चीय	१	१	१									२	तो।ततःपंचमकोष्टस्थपंचमांकेन
पंचाक्षरवृत्तस्यएकगुरुचतु	२	१	२	१								४	लंघुयुक्तंभेदपंचकामितिनि
र्द्धारितैकलचतुष्टुसंख्याक	३	१	३	३	१							८	गुरुलघुयुक्तपंचाक्षरभेदनि
ष्टपंचलसंख्यानिश्चीय	४	१	४	६	४	१						१६	तो।ततःषष्टकोष्टस्थैकांके
नपंचाक्षरवृत्तस्यपं	५	१	५	१०	१०	५	१					३२	चलघुयुक्तएकोभेदइ
तिनिर्द्धारितपंचल	६	१	६	१५	२०	१५	६	१				६४	संख्याकलघुयुक्त
भेदनिष्टैकलसं	७	१	७	२१	३५	३५	२१	७	१			१२८	ख्यानिश्चीय
तेकोष्टषट्क	८	१	८	२८	५६	७०	५६	२८	८	१		२५६	निष्टसर्वा
कयोजन	९	१	९	३६	८४	२२६	२२६	८४	३६	९	१	५१२	निष्पन्न

पिंग·सु·टी द्वात्रिंशत्तमांकेन च द्वात्रिंशद्रूपा समस्ता पंचाक्षरवृत्तभेदसंख्या प्रतीयते एवमग्रेसुधीभिः स्व
३२ यमस्यं ग्रंथविस्तरभयान्मया न लिख्यते ॥ ४४ ॥ अमुकमात्रावर्णप्रस्तारयोः एतावद्गुरु
लघुयुक्तो भेदः एतावत्संख्याक इति मेरुपंक्तिवर्त्तितत्तत्कोष्ठस्थांकनिर्द्धारितस्वरूपसंख्या
कानां भेदानां प्रथमद्वितीयादिप्रातिस्विकरूपस्य निर्द्धारणं तन्निर्धारकांकसमूहो वा पताका।
सा द्विविधा वर्णपताका मात्रापताका चेति। वर्णपताकानिर्माणप्रकारमाह। उद्दिष्टासरित्यंके
ति। उद्दिष्टासरि। उद्दिष्टसदृशान्। उद्दिष्टपदस्योद्दिष्टांकपरत्वात् उद्दिष्टांकसदृशानित्यर्थः अं
कअंकान्दिज्जसुदेहिपर्वमेकमंकं दत्वा उत्तरोत्तरं द्विगुणितानद्विचतुरष्टादिकानंकान्यथा
प्रस्तारसंख्यां स्थापयेदित्यर्थः ततः पुव्वअंकपर्वांकस्य परंपरस्मिन्नुत्तरवर्त्तिनीतियावत्। अं राम॰
के इति शेषः पत्थरसंखप्रस्तारसंख्यप्रस्तारस्य संख्या यस्यां क्रियायां तद्यथा स्यात्तथेत्यर्थः। ३२

भरणं योजनं कारिज्जसु कुरु यस्य पूर्वांकस्य यस्य परांकयोजने प्रस्तारसंख्यांकोऽङ्को निष्पद्यते
तस्य पूर्वांकस्य तत्र परांकयोजनं न कार्यमित्येको नियम इत्यर्थः एवं कृते पाउलत्ति अंकपठमत्र
बहु भाषायां पूर्वनिपातानियमात् प्रथममप्राप्तमंकमित्यर्थः परितेज्जसु परित्यजय यस्य पू
र्वांकस्य यस्य परांकयोजने पूर्वप्राप्तो ङ्को निष्पद्यते तत्र योजनं न कार्यमिति द्वितीयो नियम इत्यर्थ
ः एवं प्रकारेण वर्णानामिति शेषः पताकाकिज्जसु पताकां कुरु इति योजना अत्रायं पूर्वांकः य
त्र परांके प्रथमं योज्यते तेयोजननिष्पन्ना अंकाः तत्परांकादधोधः स्थाप्या इति नियमो गुरूप
देशादवधारणीयः पूर्वांकस्य सर्वपरांकयोजने ये ङ्का निष्पद्यंते तैः कोष्ठपंक्तिर्बोध्या अथैतद
नुसारेण चतुर्वर्णपताकालेखनप्रकार उच्यते। चतुर्वर्णपताकायामादौ एकं कोष्ठं कर्त्तव्यं ततउ
र्ध्वाधः कोष्ठचतुष्टयं कल्पनीयं तत ऊर्ध्वाधः कोष्ठषट्कं तत ऊर्ध्वाधः कोष्ठचतुष्टयं ततः एकः कोष्ठः

१	२	४	८	१६
	३	६	१२	
	५	७	१४	
	९	१३	१५	
		१०		
		११		

एवंपरस्परसंश्लिष्टैरेवंकोष्टस्थानपंचकंविधायतत्रोपरितनप्रथमद्वितीय
तृतीयचतुर्थपंचमकोष्टेषुएकद्विचतुर्थाष्टषोडशेतिपंचांकाः यथाक्रमंस्था
प्याः तत्रप्रथममेककोष्टस्थानमेकांकयुक्तमितिसर्वोपेक्षयापूर्वएकोंकःसच
उत्तरवर्तीषुद्वितीयचतुर्थाष्टमांकेषुयोज्यमानःप्रथमंद्वितीयांकेयोज्यतेइति
तद्योजननिष्पन्नाः त्र्यंकाद्वितीयांकादधोधः स्थाप्याइति एकांकद्वितीयांकयो
जननिष्पन्नतृतीयांकोद्वितीयांकादधः स्थाप्यः ततः एकाष्टमांकयोजननिष्पन्नोन
वमोंकः पंचमांकादधः स्थाप्यस्ततएकांकस्य षोडशांकयोजनेसप्तदशोंकः प्रस्तारसंख्या
तोऽधिकसंख्याकोनिष्पद्यतेइतितस्यतत्रयोजनंनकार्य्यंएवंप्रथमांकस्यद्वितीयचतुर्थाष्ट एम॰
मांकेषुयोजनंकृत्वानिष्पन्नद्वितीयातृतीयपंचमनवमैश्चत्रिभिरंकैर्द्वितीयस्थानकोष्टपंक्तिः ३३
४ ततएकांकचतुर्थांकयोजनानिष्पन्नः पंचमांकस्तृतीयांकादधःस्थाप्यः। ५

कल्पनीया एतत्कोष्ठपंक्तिस्था द्वितीयादयश्चत्वारोऽप्यंकाश्चतुर्थाष्टमांकपूर्ववर्जिन इति क्रमे
ण । तयोर्योज्यमानाः प्रथमं चतुर्थांके योज्यं ततस्तद्योजननिष्पन्नाश्चांकाश्चतुर्थांकादधो
धः स्थाप्याः इति द्वितीयचतुर्थांकयोजननिष्पन्नः षष्ठांकः चतुर्थांकादधः स्थाप्यः ततस्तृती
यचतुर्थांकयोजननिष्पन्नः सप्तमोंकः षष्ठांकादधः स्थाप्यः ततः पंचमचतुर्थयोजनेन नवमां
कः प्रथमप्राप्तो निष्पद्यते इति तस्य तत्र योजनं न कार्यमिति पंचमाष्टमांकयोजननिष्पन्नस्त्र
योदशांकः सप्तमांकादधः स्थाप्यः एवं द्वितीयादिचातुर्णामंकानां चतुर्थांकयोजनं कृत्वा द्वि
तीयाष्टमांकयोजननिष्पन्नो दशमांकस्त्रयोदशांकादधः स्थाप्यस्ततस्तृतीयाष्टमयोजननि
पन्न एकादशांको दशमांकादधः स्थाप्यस्ततः पंचमाष्टमयोजननिष्पन्नस्त्रयोदशांकः प्रथम
प्राप्तो निष्पद्यते इति तयोर्योजनं न कार्यं नवमाष्टमयोजननिष्पन्नः सप्तदशो नवमषोडश

योजननिष्पन्नः पंचविंशतितमश्चांकः प्रस्तारसंख्यातोऽधिकसंख्याको निष्पद्यते इति तद्योजनं न कार्यं एवं द्वितीयाद्यंकानां चतुर्थाष्टमांकयोर्योजनं कृत्वा चतुर्थषष्टसप्तमत्रयोदशदशमैकादशेति षडंकैः तृतीयस्थानकोष्टपंक्तिः कल्पनीया ततश्चतुर्थादयः षडंकाश्चाष्टमांक एवं वर्त्तिन इति तेषां तत्र योजने चतुर्थाष्टमयोजननिष्पन्नो द्वादशांको ष्टमांकादधः स्थाप्यस्ततः षष्ठाष्टमांकयोगनिष्पन्नश्चतुर्दशांको द्वादशांकादधः स्थाप्यस्ततः सप्तमाष्टमयोगनिष्पन्नः पंचदशांकश्चतुर्दशांकादधः स्थाप्यस्ततस्त्रयोदशदशैकादशांकानामष्टमांकयोजने त्वष्टमादीनां च षोडशांकयोजने प्रस्तारसंख्यातोधिकसंख्याका अंका निष्पद्यंते ततस्तेषां तत्र योजनं न कार्यं एवं चतुर्थाष्टमांकयोर्योजनं कृत्वाष्टमद्वादशचतुर्दशपंचदशेति चतुर्भिरंकैश्चतुर्थस्थानकोष्टपंक्तिः कल्पनीया पंचमस्थानकोष्टकं षोडशांकयुक्तं कल्पनीयं एवं च

तुर्वर्णवृत्तपताकायां कोष्टस्थानपंचकं कल्पनीयं। तत्स्वरूपं लिखित्वा प्रदर्श्यते एवं चतुर्वर्णमेरुपं
क्तिवर्त्तिप्रथमकोष्टस्थैकांकनिर्द्धारितचतुर्गुरुयुक्तस्वरूपैकत्वसंख्याकस्य भेदस्य प्रथम इति
प्रातिस्विकरूपं पताकाप्रथमकोष्टस्थैकांकेन निर्द्धार्य्यते चतुर्गुरुयुक्त एको भेदः प्रथम इति॥
एवं चतुर्वर्णमेरुपंक्तिवर्त्तिद्वितीयकोष्टस्थचतुर्थांकनिर्द्धारितत्रिगुरुयुक्तत्वस्वरूपचतुष्टसंख्या
कानां भेदानां द्वितीयतृतीयपंचमनवमेति प्रातिस्विकं रूपं चतुर्वर्णपताकाद्वितीयस्थानकोष्ट
पंक्तिवर्त्तिभिश्चतुर्भिरंकै निर्द्धार्य्यते। एकलघुत्रिगुरुयुक्ताश्चत्वारो भेदा द्वितीयतृतीयपंचम
नवमरूपा इति॥ एवं चतुर्वर्णमेरुपंक्तिवर्त्तितृतीयकोष्टस्थषष्टांकनिर्द्धारितद्विगुरुद्विलघु
युक्तत्वस्वरूपषट्संख्याकानां भेदानां चतुर्थषष्टसप्तमत्रयोदशदशमेकादशेति प्रातिस्विक
रूपं पताकातृतीयस्थानकोष्टपंक्तिवर्त्तिभिः षड्भिरंकैर्निर्द्धार्य्यते द्विगुरुद्विलघुयुक्ताः षड्भेदाः

 चतुर्थषष्ठसप्तमत्रयोदशदशमैकादशरूपाइतिएवंचतुर्वर्णमेरुपंक्तिवर्त्तिचतुर्थकोष्ठस्यच
३५ तुर्थांकनिर्द्धारितैकगुरुत्रिलघुयुक्तलस्वरूपचतुष्कसंख्याकानांभेदानामष्टमद्वादशचतुर्दशपं
चदशेतिप्रातिस्विकंरूपंपताकाचतुर्थस्थानकोष्ठपंक्तिवर्त्तिभिश्चतुर्भिरंकैरवधार्य्यतेएकगु
35 रुलघुत्रिलघुयुक्ताश्चत्वारोभेदाअष्टमद्वादशचतुर्दशपंचदशरूपाइति॥एवंचतुर्वर्णमेरुपं
क्तिवर्त्तिपंचमकोष्ठस्थैकांकनिर्द्धारितचतुर्लघुयुक्तलस्वरूपैकलसंख्याकस्यभेदस्यषोडश
इतिप्रातिस्विकंरूपंपताकापंचमकोष्ठस्थषोडशांकेननिर्द्धार्य्यतेचतुर्लघुरेकोभेदः षोडशइति॥
एवमन्याअपिपताकाबोध्याः ग्रंथविस्तरभयान्नालिख्यते॥४१॥ अथमात्रामेरुप्रकारमाह
।दुइकोट्ठेति। दुइ द्वयोर्द्वयोः कलयोरितिशेषः कोट्ठा कोष्ठकानि सरिसहद्वानि समसंख्याकानीति एम०
ह यावत्तलिक्खु लिखत। एककलप्रस्ताराभावात् द्विकलमारभ्य मेरुस्थितिः एवंच द्वितीयेति द्वयोः कल ३५

ध्येरिति शेषः। अयोः प्रत्येकं कोष्ठद्वयं ऊर्ध्वाधः स्थित्या परस्परसंश्लिष्टं चतुर्थपंचमे इति द्वयोः कल
योः प्रत्येकं कोष्ठत्रयं ऊर्ध्वाधः स्थित्या परस्परसंश्लिष्टं षष्ठसप्तमे इति द्वयोः कलयोः ऊर्ध्वाधः स्थित्या
परस्परसंसक्तं प्रत्येकं कोष्ठचतुष्टयमित्यादि। इत्यादिद्वयोर्द्वयोः कलयोः समसंख्याकानूर्ध्वाधः स्थि
त्या परस्परसंसक्तानि कोष्ठकानि उत्तरोत्तरं वर्द्धितानि गुरूपदेशात् कल्पनीयानीति निर्गलितार्थः
अत्र कोष्ठसाहस्रं समसंख्याकत्वमेव। तस्मिन्नेषु कोष्ठेषु अंते अंतिमे कोष्ठे इत्यर्थः पठमंकं प्रथमोऽंकः
स्थाप्यः इति शेषः। तस्तु आइहितेषाद्येषु कोष्ठेषु मध्ये विषमे प्रथमतृतीयपंचमसप्तमादिको
ष्ठेषु एकैकः अंकः स्थाप्य इत्यनेन संगः क्वचित् द्विषमे इत्यस्य स्थाने पठमे इति पाठः तत्र समादि
त्यध्याहृत्य योज्यं एवं च समात्प्रथमे एवं वर्त्तिनि विषमे इति स एवार्थः यतः समात्सर्ववर्त्ति विष
मएवेति सउसमेषु द्वितीयचतुर्थषष्ठादिषु कोष्ठेषु वे विमिलंतद्वौ मिलितौ एवांकाविति शेषः स्था

पिं॰ग॰गु॰टी॰ पर्येत्यनुषंगः आद्याः ये विषमाः कोष्ठास्तेषु एकोंकं देयं । ये समास्तेषु एवैवस्यैकद्वययोजननि

३६ ष्पन्नोऽंको देय इत्यर्थः ततः उवरलकोष्ठ उर्वरितानि आद्यंतांतरालस्थितानि कोष्ठकानीत्यर्थः

36 सिरश्चकेतसुसिरपरश्चके शिरोंकतत्छिर उपर्यंकाभ्यांणीसंकनिः शंकं यथास्यात्तथा एवं दिएरय

एवं श्चकसंचारिश्चकान्संचार्य संस्थाप्य जगादु इचारिजना द्विचत्वारः मत्तामेरुमात्रामेरुं जा

णाकुंबुध्यध्वं इति योजना । अथैतन्निर्माणप्रकारो लिख्यते । एकैककलप्रस्ताराभावात् द्विकल


मारभ्य मेरुप्रवृत्तिः एवं च प्रथमं वामदक्षिणयोरिर्वांगुलमात्रदीर्घं मध्ये रेखा ततः उर्द्धमधश्च

द्व्यंगुलमात्रमंतरं विसृज्योर्द्धाधो रेखात्रयं कार्यं ततः तत्पार्श्वद्वयमेलनं ऋजुरेखया कार्यं ए

वं दीर्घकोष्ठद्वयं विधाय तत्र प्रथमरेखामध्यदेशमारभ्याधस्तनतृतीयरेखामध्यदेशपर्यं एम०

तं ऋजुरेखां दत्वा प्रथमस्थाने उर्द्धाधःस्थितयोः परस्परसंसक्तं कोष्ठचतुष्टयं कार्यं तत्रांति ३६

मकोष्ठयोः प्रत्येकमंको देयः आद्ये उपरितने प्रथमे च विषमत्वादेको देयः तदध
स्तने च द्वितीयत्वात्समे उपरितनकोष्ठद्वयस्थैकांकद्वयरूप एवांकद्वययोज
ननिष्पन्नद्वितीयांकेन पूरणो विधेयः। एवं चोपरितनकोष्ठद्वयं द्विकलमे
रुपंक्तिः तत्र प्रथमकोष्ठस्थैकांकेन द्विकलकस्यैकगुरुरूप एको भे
द इति द्वितीयकोष्ठस्थैकांकेन च द्विलघुरेको भेद इति प्रतीयते को
ष्ठद्वयस्थैकांकद्वययोजननिष्पन्नद्वितीयांकेन च द्विकल
स्य भेदद्वयमिति द्विकलगणभेदपिंडीभूता समस्ता
द्विलसंख्या प्रतीयते। एवमधस्तनकोष्ठद्वयं त्रि
मात्रमेरुपंक्तिः तत्र प्रथमकोष्ठस्य द्वितीयां



पिंग॰सु॰टि॰ केनचत्रिकलप्रस्तारेएकगुरुयुक्तंभेदद्वयंद्वितीयकोष्ठस्थेकांकेनचत्रिलघुयुक्तएकोभेदइ
३७ तिप्रतीयते॥कोष्ठद्वयस्यद्वितीयेकस्यंकद्वययोजननिष्पन्नतृतीयांकेनचत्रिकलस्यसमस्ताः
त्रयोभेदाइतिपिंडीभूतासमस्तात्रिलघुरूपात्रिकलगणभेदसंख्याप्रतीयतेततोऽधस्तनांतृती
37 यांरेखामाद्यंतयोःपार्श्वयोर्मनागवर्द्धयित्वाधोधएकैकमंगुलमंतरंविसृज्यतत्परिमाणंरेखा
द्वयंकार्यंऋजुरेखयातत्पार्श्वद्वयमेलनंचकार्यंएवंत्रिकलमेरुपंक्तिसंसृष्टतदधःस्थंदीर्घं
कोष्ठद्वयंकार्यंतत्रोपरितनत्रिकलमेरुपंक्तिप्रथमकोष्ठाधोरेखामध्यदेशमारभ्याधस्तनां
तिमरेखामध्यपर्यंतमेकाऋजुरेखाकार्याएवंतत्पंक्तिद्वितीयकोष्ठाधोरेखामध्यदेशमारभ्या
धस्तनांतिमरेखापर्यंतमेकाऋजुरेखाकार्याएवंद्वितीयस्यानु ऊर्ध्वापेक्षयात्रअधःस्थितस्याप राम॰
रस्यरसंसक्तंकोष्ठषट्कंकार्यंतत्रोपरितनकोष्ठत्रयात्मिकासर्वापेक्षयातृतीयाचतुःकलमेरु ३७

पंक्तिः तत्र सर्वापेक्षया तृतीयत्वाद्विषमेरुं प्रथमकोष्टे सर्वांतिमे च तृतीये एकांको देयः द्वितीये च
शिरोंकतच्छिरोंकद्वितीयेकेत्यंकद्वययोजननिष्पन्नं तृतीयांकेन पूरणं विधेयं एवं तदधस्तनी
कोष्टत्रयात्मिका चतुर्थी पंचकलमेरुपंक्तिः तत्र प्रथमकोष्टे सर्वापेक्षया चतुर्थत्वात्समेरएकद्वयेति
एवं कद्वययोजननिष्पन्न तृतीयांकेन पूरणं कार्य्यं तदग्रिमे च द्वितीयकोष्टे शीरोंकतच्छिरोंकतृती
येकेत्यंकद्वययोजननिष्पन्नं चतुर्थांकेन पूरणं कार्य्यं। तदग्रिमे च तृतीयकोष्टे सर्वांतिमेएकांको देयः
ः तत्रोपरितनकोष्टत्रयात्मकचतुःकलमेरुपंक्तिः प्रथमष्टकोष्टस्थेकांकेन चतुःकलप्रस्तारे द्विगु
रुरेको भेद इति प्रतीयते। तदग्रिमे द्वितीयकोष्टस्थात्तृतीयांकेन च तत्र प्रस्तारे एकगुरुयुक्तो भेद
त्रयमिति प्रतीयते। अंतिमतृतीयकोष्टस्थेकांकेन च तत्र प्रस्तारे त्रिलघुयुक्त एको भेद इति प्रती
यते एकतृतीयेकेति कोष्टत्रयस्थसमस्तांकयोजननिष्पन्नपंचमांकेन त्रिकलस्य पंच भेदा इति

समस्तापिंडीभूताप्रस्तारसंख्याप्रतीयते। एवमेतदधस्तनकोष्ठत्रयात्मकपंचकलमेरुपंक्ति
प्रथमकोष्ठस्थतृतीयांकेनपंचकलप्रस्तारे द्विगुरुयुक्तंभेदत्रयमितिप्रतीयते तदग्रिमद्विती
यकोष्ठस्थचतुर्थांकेनचतत्रप्रस्तारे एकगुरुयुक्तंभेदचतुष्टयमितिप्रतीयते तदग्रिमतृतीय
कोष्ठस्थैकांकेनचतत्रप्रस्तारेपंचलघुयुक्तएकोभेदइतिप्रतीयते॥ कोष्ठस्थत्रिचतुरेकेत्यंक
त्रययोजननिष्पन्नाष्टमांकेनचपंचकलस्याष्टभेदाइतिसमस्तापिंडीभूताष्टरूपापंचक
लप्रस्तारसंख्याप्रतीयते। एवंएवंवदेति स्कोष्ठद्वयादधस्ताद्दीर्घंकोष्ठद्वयंनिर्माय उपरितन
पंचकलमेरुपंक्तिप्रथमकोष्ठाधोरेखामध्यदेशमारभ्याधस्तनद्वितीयकोष्ठाधोरेखामध्यप
र्यंतंऋजुरेखादेयाततउपरितनतृतीयकोष्ठाधोरेखामध्यदेशमारभ्याधस्तनद्वितीयकोष्ठा
धोरेखापर्यंतंऋजुरेखादेयाततउपरितनतृतीयकोष्ठाधोरेखामध्यमारभ्याधस्तनको

ष्ठाधोरेखापर्यंतं ऋजुरेखा देया एवं तृतीयस्थाने ऊर्ध्वाधः । स्थित्या परस्परसंसक्तं कोष्ठाष्टकं
कार्यमत्रोपरितनं कोष्ठचतुष्टयं षट्कलमेरुपंक्तिः तत्र प्रथमकोष्टे सर्वोपेस्य पंचमत्वाद्विष
मे सर्वांतिमे चतुर्थे च एकांको देयः द्वितीयकोष्टे च शिरोंकतच्छिरोंकतृतीयांकद्वययोजननि
ष्पन्नषष्टांकेन पूरणं कार्यं तदग्रिमे च तृतीयकोष्टे शिरोंकतच्छिरोंकचतुर्थेकेत्यंकद्वययोजन
निष्पन्नपंचमांकेन पूरणं विधेयं एवं चात्र प्रथमकोष्टस्थैकांकेन षट्कलप्रस्तारे त्रिगुरुयुक्त ए
को भेद इति प्रतीयते तदग्रिमद्वितीयकोष्टस्थषष्टांकेन च प्रस्तारे द्विगुरुयुक्ताः षड्भेदा इति प्रती
यते तदग्रिमतृतीयकोष्टस्थपंचमांकेन चात्र प्रस्तारे एकगुरुयुक्ताः पंचभेदा इति प्रतीयते तत
दग्रिमचतुर्थैकांकेन च षड्लघुयुक्त एको भेद इति प्रतीयते कोष्टचतुष्टयस्थांकचतुष्टययोजन
निष्पन्नत्रयोदशांकेन च समस्तापिंडीभूता षट्कलप्रस्तारसंख्या त्रयोदशरूपा प्रतीयते । तदध

स्य१

पिं॰मु॰टी॰ त्तनं कोष्टचतुष्टयं चस प्रकल्पं तत्र सर्वांतिमे चतुर्थे कोष्टे एकांकेन पूरणं विधेयं प्रथमकोष्टे
३९ चसर्वोपेक्षया षष्टत्वात्स मेरोकत्ततीये ति पूर्वांकद्वययोजननिष्पन्न चतुर्थांकेन पूरणं कार्यं त
दग्रिमे च द्वितीयकोष्टे शिरोंकतच्छिरोंकषष्टचतुर्थत्र्यंकद्वय योजननिष्पन्न दशांकेन पूरणं का
यं तदग्रिमतत्ततीयकोष्टे च शिरोंकतच्छिरोंकपंचमेकत्र्यंकद्वययोजननिष्पन्न षष्टांकेन पूरणं
कार्यं चतुर्थांकेन सप्रकल्पप्रस्तारे त्रिगुरुयुक्तभेदचतुष्टयमिति प्रतीयते तदग्रिमद्वितीयको
ष्टस्य दशमांकेन च तत्र प्रस्तारो द्विगुरुयुक्ता दशभेदा इति प्रतीयते तदग्रिमतत्ततीयकोष्टस्य षष्टां
केन च तत्र प्रस्तारे एकगुरुयुक्ताः षड्भेदा इति प्रतीयते तदग्रिम चतुर्थकोष्टस्यैकांकेन च तत्र प्रस्ता
रे सप्त लघुयुक्तः एको भेद इति प्रतीयते कोष्टचतुष्टयस्थांकचतुष्टययोजननिष्पन्नेकविंशति एम॰
तमांकेन च सप्तप्रस्तापिंडी भूता एकविंशतिरूपा सप्रकल्पमेरुपंक्तिः एवमग्रेपि मेरुकल्पनाय ३९

येच्छं विधेया अस्माभिस्तु ग्रंथविस्तरभयात्प्रयोजनाभावाच्च न लिखिता॥४७॥ अथ मात्रापता
कानिर्माणप्रकारमाह उद्दिष्टा सदृशांका इति उद्दिष्टा। सदृशांका अत्र उद्दिष्टपदस्योद्दिष्टांकपरत्वा
दुद्दिष्टांकसदृशानंकानेकद्वित्रिपंचाष्टत्रयोदशानित्यर्थः। यथ्यूह्य क्रमेणोत्तरोत्तरं स्थापयत
तान् इति शेषः वामावर्त्ते। वामावर्त्तेन प्रतिलोमविधिना सर्वांतिमांकाव्यवहितपूर्वांकमारभ्येति
यावत्। लेइशद्दीत्वा परस्परस्मिन्सर्वांतिमांके नुप्लद्ध लोपयत न्यूनतां नयत सर्वांतिमेंके तद
व्यवहितपूर्वांकमारभ्य पूर्वपूर्वांकाः क्रमेण लोप्याः इत्यत्र एकलोपे एकलोपे अत्र एकपदस्ये
कांकपरत्वादेकांकलोपे इत्यर्थः एकं गुरुं जाणह एकं गुरुं जानीत इति। लोपे द्वित्राणामंकानां
लोपे दुन्नि तिण्णि द्वित्रान् गुरून् जाणह जानीत एकैकपूर्वांकलोपे येंका अवशिष्यंते ते एकगुरु
युक्तभेदज्ञापकाः पूर्वांकद्वयलोपे येंका अवशिष्यंते ते गुरुद्वययुक्तभेदज्ञापकाः पूर्वांकत्रय

पिं०ग०सु०टी लोपेयेऽवशिष्यंते ते गुरुत्रयस्य क्रमभेदज्ञापका इति निर्गलितार्थः एवं प्रकारेण पिंगलनाग
४० पिंगलो नागः मत्तपताकामात्रापताकां गावइ गायति कथयति। तीस्यार्थः जो पावइ यः प्राप्नोति गु
रूपदेशाज्ज्ञानाति सो परहिं वुज्झावइ सः परं बोधयति इति योजना॥ अत्रत्रयः एकत्वा संख्या
विशिष्टो द्वित्वसंख्याविशिष्टो वा पर्वांकः प्रथमं सर्वांतिमांके लुप्यते तदव्यवहितपूर्वांकमार
भ्यावशिष्टांकाः क्रमेणाधोऽधः स्थाप्या इति पदकद्वयलोपे अन्यमवशिष्यते एवं प्राप्तो वांकः
माप्यते तदंकद्वयलोपो न कार्य इति नियमत्रयं गुरूपदेशादध्यवसेयं॥ अथ षट्कलपताकास्वरू
पलिखनप्रकार उच्यते। वामदक्षिणयोरंगुलपंचकपरिमाणमूर्ध्वाधोऋजुरेखाद्वयमर्द्धांगुल
मधिकं वा मध्यदेशेंऽतरं विसृज्य कर्त्तव्यं ततो ऋजुरेखया तत्पार्श्वमेलनं विधेयं एवमेकं दीर्घ एम०
कोष्टं विधाय तत्रैकांगुलपरिमितमंतरं त्यक्त्वोर्द्धरेखामारभ्याधोरेखापर्यंतं पंच ऋजुरेखाः ४०

१	२	३	५	८	१३
	३		८		
	४		१०		
	६		११		
	७		१२		
	९				

क्रमेणदत्वा कोष्टषट्कमुत्तरोत्तरं परस्परसंश्लिष्टं विधेयं ततोद्दिष्टांक
सहशाएकद्वित्रिपंचाष्टत्रयोदशेति षडंकाः क्रमेणस्थाप्याः ततोद्वि
तीयांककोष्टादधोऽधोगुणमितानि परस्परसंश्लिष्टानि पंचकोष्टानि कार्या
णि ततः पंचमांककोष्टादधोऽधस्तादेशमेव कोष्टचतुष्टयं कार्यं ततः सर्वांति
मत्रयोदशांकमध्ये तदव्यवहिताष्टांकलोपे उर्वरितं पंचमांकं तच्चतुर्थकोष्टे
विन्यस्तमेवास्तीति तदन्यन्नलेख्यमिति संप्रदायः ततः सर्वांतिम~~त्रयोदश~~स्था
माष्टमांककोष्टादव्यवहितपूर्ववर्त्ति पंचमांकलोपे उर्वरितमष्टमांकं पंचमांकादधस्स्थाप्यं त
तः क्रमप्राप्तत्तीयांकलोपे उर्वरितं दशमांकमष्टमांकादधस्तनकोष्टे स्थाप्यं ततस्तत्रैव क्रम
प्राप्तद्वितीयांकलोपे उर्वरितमेकादशांकं दशमांकाकोष्टादधस्तनकोष्टे स्थाप्यं ततस्तत्र क्रमप्रा

५१

प्राप्ते कांकलोपे उर्वरितद्वादशांकमेकादशांककोष्टादधस्तनकोष्टे स्थाप्यं॥ सेयमेकांकलोपनि
निष्पन्ना पंचकोष्टात्मिका षट्कलमेरुपंक्तिः॥ तृतीयकोष्टस्थपंचमांकनिर्द्धारितैकगुरुयुक्ताव
स्वरूपपंचत्वसंख्याकानां षट्कलगणभेदानां पंचमाष्टमदशमैकादशद्वादशेति प्रातिस्विक
रूपज्ञापिका षट्कलपताकापंक्तिः॥ ततो द्व्यंकलोपेऽष्टपंचमांकयोस्त्रयोदशांकमध्ये लोपः अ
न्यशेषत्वान्न कार्य इति। सर्वांतिमत्रयोदशांकमध्ये त्र्यष्टमतृतीये त्र्यंकद्वयलोपे उर्वरितं द्विती
यमंकं ततो द्वितीयकोष्टेऽस्त्येव ततस्त्रयोदशमध्ये त्र्यष्टमद्वितीये त्र्यंकद्वयलोपे उर्वरितं तृतीयां
कं द्वितीयांककोष्टादधस्तनकोष्टे स्थाप्यं। ततस्त्रयोदशमध्ये त्र्यष्टमेके त्र्यंकद्वयलोपे उर्वरितं
चतुर्थमंकं तृतीयांककोष्टादधस्तनकोष्टे स्थाप्यं। ततः त्रयोदशमध्ये पंचतृतीये त्र्यंकद्वयलोपे
प्रथमप्राप्तः पंचमांकोऽवशिष्यत इति पंचमतृतीयांकयोर्लोपं त्यक्त्वा पंचमद्वितीययोर्लोपे त्र

वशिष्टः षष्ठांकश्च चतुर्थांककोष्टादधस्तनकोष्टे स्थाप्यः। ततः तत्र पंचमे केत्यंकद्वय लोपे अवशि
ष्टः सप्तमांकः षष्टांककोष्टादधस्तनकोष्टे स्थाप्यस्ततः तत्र तृतीय द्वितीयेत्यंकद्वय लोपे अवशि
ष्टोऽष्टमोंकः प्रथमप्राप्तोऽवशिष्यते इति तयोस्तत्र लोपं स्यात्तृतीये केत्यंकद्वय लोपे अव
शिष्टो नवमोंकः सप्तमांककोष्टादधस्तनकोष्टे स्थाप्यः सेयमंकद्वयलोपनिष्पन्ना षट्कलमेरुपं
क्तिः द्वितीयकोष्टस्य षष्टांकनिर्धारित द्विगुरुयुक्त लघुस्वरूप षट्कसंख्याकानां षट्कलभेदानां द्वितीय
तृतीय चतुर्थ षष्ट सप्तम नवमेति प्रातिस्विक रूपज्ञापिका षट्कोष्टात्मिका षट्कलपताकापंक्तिः।
एवं तत्र प्रथम तृतीयाष्टेत्यंकत्रय लोपे उर्वरितएकोंकः स च षट्कलमेरुप्रथमे कोष्टस्थैकांकनि
र्धारित त्रिगुरुयुक्त लघुस्वरूपैकत्व संख्याकस्य षट्कलभेदस्य त्रिगुरुयुक्तो भेदः प्रथम इति प्राति
स्विक रूपज्ञापकः प्रथमे कोष्टेऽस्त्येवेति सर्वमनवद्यं॥ ४८ ॥ अथामुकमात्राष्टत्तास्य कति

पिं.ग.गु.टी. प्रभेदाः कियंतो मात्राः कियंतो वर्णाः कति लघवः कति गुरवश्चेति जिज्ञासायां मर्कट्याख्य
४२ 42 वतारः। तत्र कथं कोष्ठानि कार्याणि कथं च तानि पूरणीयानीति प्रकारमाह। छत्रछेति। षट्को
ष्ठात्मिका षट्पंक्तयः कार्याः। तत्र षट्सु पंक्तिषु अंका देयाः। कथं तत्रांका देया इति प्रकारमाह
दुइस उइति। प्रथमपंक्तौ द्वितीयमारभ्य सप्तमपर्यंतमंका देयाः। द्वितीयपंक्तौ कोष्ठद्वयं युगरूप
देशात्तच्छिरोंकेन पूरयित्वोर्वरितानि कोष्ठानि एवं युगलेन पूरणीयानि। प्रथमपंक्तिस्थां
कं द्वितीयपंक्तिस्थांकेन द्विगुणीकृत्य तृतीयपंक्तिस्थकोष्ठानि पूरणीयानि॥ पंचमकोष्ठभ
रणप्रकारमाह। वेवीति॥ पंचमपंक्तौ द्वित्वबोधकमंकं दत्वा तदनंतरं पंचमोंको देयः। ततोऽव्य
वहितं एवं वर्तिकोष्ठांकं द्विगुणीकृत्य कोष्ठद्वयं निःशंकं यथा स्यात्तथा पूरणीयमित्यर्थः एकां राम°
कं चतुः कोष्ठांके योजयित्वा यन्निष्पद्यते तान्नं तदग्रिमकोष्ठे स्थापय। ततः पंचमांकस्यत्काच ४२

२	३	४	५	६	७	८	९	१०	वृत्तानि
२	३	५	८	१३	२१	३४	५५	८९	प्रभेदाः
४	९	२०	४०	७८	१४९	२७२	४९५	८९०	मात्राः
३	७	१५	३०	५८	१०९	२०१	३६५	६५५	वर्णाः
२	५	१०	२०	३८	७१	१३०	२३५	४२०	लघवः
१	२	५	१०	२०	३८	७१	१३०	२३५	गुरवः

तुःकोष्ठांकमेकांकैः नयोजयित्वा
तदग्रिमकोष्ठस्योपयननुकोष्ठा
ङ्कलेखाभावेन कथमेतैरंकैः पंचपं
क्तिस्थकोष्ठानि पूरणीयानीति चे
त्सत्यं। प्रथमद्वितीयतृतीयच
तुर्थषष्ठपंक्तिपूरकप्रकारेजाग
रूके सत्यथापि पंचमीपंक्तिः पूरणीयेति विज्ञापनत इति न दोषः। एकत्वबोधकमंकं प्रथमं षष्ठ
पंक्तौ दत्वा तच्छिरोंकेनावशिष्टानि कोष्ठानि पूरणीयानि। रंगेण विचित्रवर्णेनेति यावत्। पंच
मषष्ठपंक्तिस्थांकेन चतुर्थपंक्तिः पूरणीयानिः शंकं यथा स्यात्तथा॥ किमेतैरंकैर्ज्ञातव्यमित्या

43

कांक्षायामाह वित्तपभेअ इत्यादिना। अमुकवृत्तस्यैते प्रभेदाः एतामात्राः अथ च एते वर्णा
ः। एते लघव एते गुरवः यः कश्चित्पंडितः स एतां मर्कटीं बुध्यति। तस्य पंडितस्येयं मर्कटी
अवबुद्धा न तिष्ठति॥ ४८॥ अथ वर्णमर्कटीलिखनप्रकारमाह। अक्खरसंखे इत्यादिना अ
क्षरसंख्यया कोष्ठानि च कार्याणि तथा च षट्कोष्ठात्मिकाः षट्पंक्तयो निष्पद्यंते तत्र च षट्सु पं
क्तिषु अंका देयाः कथमंका देया इत्याकांक्षायामाह एकद्वीति। प्रथमपंक्तावादौ एकत्वबो
धकमंकं दत्त्वा तदनंतरमुर्वरितानि कोष्ठानि द्वित्वादिबोधकैरंकैः पूरणीयानि। तथा द्विती
यपंक्तौ द्वित्वबोधकमंकं प्रथमं विधाय तद्द्विगुणांकैरुर्वरितानि कोष्ठकानि पूरणीयानि। प्र
थमपंक्तिस्थांकं द्वितीयपंक्तिस्थांकेन क्रमशो गुणयित्वा चतुर्थपंक्तिस्थकोष्ठेषु स्थापनीयाः एम॰
चतुर्थपंक्तिस्थांकार्द्धेन पंचमपंक्तिस्थकोष्ठकानि ध्रुवं पूरणीयानि। तथा च तुर्थे पंचमपंक्ति ४३

१	२	३	४	५	६	७	८	वृत्तानि
२	४	८	१६	३२	६४	१२८	२५६	प्रभेदाः
३	१२	३६	९६	२४०	५७६	१३४४	३०७२	मात्राः
२	८	२४	६४	१६०	३८४	८९६	२०४८	वर्णाः
१	४	१२	३२	८०	१९२	४४८	१०२४	लघवः
१	४	१२	३२	८०	१९२	४४८	१०२४	गुरवः

स्थांकानेकीकृत्ययावतीसंख्यासंपद्यते। तद्बोधकांकेनतृतीयपंक्तिस्थकोष्टकानिपूरणीयानि। तथाचपंचमपंक्तिकोष्टस्थांकानादायषष्टपंक्तिस्थकोष्टानिपूरणीयानीतिसमुदायार्थः॥ किमेतैरंकैर्ज्ञातव्यमित्याकांक्षायामाह॥ वृत्तप्रभेत्यादिनाप्रथमपंक्तिस्थांकैर्वृत्तंज्ञातव्यं। द्वितीयपंक्तिस्थांकैर्नैतस्यवर्णवृत्तस्यतेप्रभेदाः। तृतीयपंक्तिस्थांकैरेतावत्योमात्राः। चतुर्थपंक्तिस्थांकैरेतेवर्णाः पंचमपंक्तिस्थांकैरेतेलघवः। षष्टपंक्तिस्थांकैरेतेगुरवइतियथायथंयोज्यम्॥५०॥

अथैतावत्संख्याककलाविशिष्टे तावत्संख्याकाक्षरचरणे वृत्ते कति गुरवः कति लघव इति कौ
तुकालेन चित्पृष्टे उत्तरप्रकारमाह पुच्छलेति पुच्छलछंदकलाप्रष्टछंदः कलायां अत्र कला
पदस्य कलासंख्यापरत्वात्प्रष्टछंदः कलासंख्यायामित्यर्थः यस्य गुरुलघुजिज्ञासा तत्प्र
ष्टछंदस्तस्य या मात्रासंख्या तन्मध्ये इत्यर्थः पुच्छछंदः प्रष्टछंद अत्रापि छंदःपदस्य छंदो
क्षरसंख्यापरत्वात्प्रष्टछंदोक्षरसंख्यायामित्यर्थः मेटावहीनां कुरु एवं कृ रि एवं कृत्वा एवं
कृते सतीत्यर्थः अवसिट्ठउ अवशिष्टां संख्येति शेषः कलासंख्यामध्ये वरितां संख्येत्यर्थः
गुरु जाणि अरु गुरोर्ज्ञातव्या उद्वरित गुरुसंख्यातिरिक्ता उद्वृत्ताक्षरसंख्येति यावत्
लघु जाणि वु लघोर्ज्ञातव्या यथा अष्टादशकलाविशिष्टैकादशाक्षरचरणे वृत्ते कति गुर
वो लघवश्चेति पृष्टे अष्टादशरूपकलासंख्यामध्ये एकादशरूपाक्षरसंख्यालोपे उर्व

रिता सप्त संख्या सा गुरुसंख्या ज्ञेया एकादशाक्षरमध्ये यदि सप्त गुरवस्तदोर्वरिताश्चतुष्टु
संख्या सा लघोर्ज्ञातव्या एवं चैतादृशचरणे वृत्ते सप्त गुरवश्चत्वारो लघव इत्यत्रोद्देयं इदं वृ
त्तं इंद्रवज्राख्यमेवमन्यत्राप्यूह्यम्॥५१॥ अथैकाक्षरमारभ्य षड्विंशत्यक्षरपर्यंतस
मस्तवर्णवृत्तपिंडीभूतसंख्यामाह। छव्वीसेति। षड्विंशतिः सप्तशतानि तथा सप्तदश सहस्रा
णि द्विचत्वारिंशल्लक्षाणि त्रयोदश कोटयः एवं समस्ताणि एकाक्षरादिषड्विंशत्यक्षरपर्यंता
नीत्यर्थः वर्णवृत्तानि भवंतीति शेषः मात्रावृत्तानामसंख्यातत्वात्तत्संख्या नोक्ता वर्णवृत्ता
नां प्रत्येकसंख्या ग्रंथविस्तरभयादनतिप्रयोजनत्वाच्चास्माभिरत्र नोक्ता। अथ प्रस्ताहुस्स
माणानां गाहूप्रभृति सप्तमात्राछंदसां सामान्यतश्चरणचतुष्टयसमुदितासंख्यारभवृत्ते
नोदिशति सत्ताइ गाहू इति गाहूनामके छंदसीत्यर्थः मत्तचौआसमात्राश्चतुःपंचाशत्सहाद

पिंगल० ४५

45

इति भवंति तह गाहाइ सत्तावस्सा इ तथा गाथायां सप्तपंचाशत्‌ मात्राः भवंतीति पूर्वानुषंग
ः तेहि तां गाथां पलट्टिय राद्धस्य गाथायाः पूर्वार्द्धं उत्तरार्द्धं कृत्वा उत्तरार्द्धं च पूर्वार्द्धं कृत्वेत्यर्थः
विग्गाह विग्गाथा किज्जिअइ क्रियते अत्र तेहि इत्येकारो ह्रस्वो बोध्यः ॥ ३२ ॥ मुद्धा अवस
मिलिआ विलद्ध इत्युक्तत्वात् उग्गाह उद्गाथा सट्ठि कल षष्टिः कलामात्रा यस्यां सेत्यर्थ
ः गाहिणी अग्गाहिन्यां वा सट्ठि द्विषष्टिः मत्तह मात्राः करु कुरु तह विपलट्टि अत्र हो इत्यो
कारः पूर्वोक्तदिशा ह्रस्वो बोध्यः अत्र क्वचित् तह गाहाइ सत्तावणी इति तह विग्गाह पलट्टि
किज्जइ इति च पाठः सरद्धा लक्षणविरुद्धत्वादुपेक्ष्यः खंध स्कंधके मत्त चौसट्ठि मात्राः चतुः
षष्टिर्भवंत्यनुषंगः एतानि सत्तरूअ सम्भ रूपकानि छंदांसि अक्खक्खगुण अन्योन्यगुणा राम० ४५
नि अन्योन्यं गुणाः षष्ठ जगण न लघु एक लघु पादांत गुर्वादयो येषां तादृशानीत्यर्थः भ

वंतीत्यनुषंगः इतियोजना॥५२॥ अथगाढू प्रभृतिसप्तछंदः सुसामान्यतोमात्राउद्दिश्य विशेषतस्तानिलिलक्षयिषुः प्रथमंगाढूलक्षयतिपव्वद्धे इतियत्रपूर्वार्द्धे उत्तरार्द्धे च पूर्वार्द्धे उ त्तरार्द्धेप्रत्रभज्येपादयोर्मध्येपूर्वार्द्धे प्रथमद्वितीयपादयोर्मध्ये उत्तरार्द्धेतीयचतुर्थयोःपा दयोर्मध्ये इत्यर्थः सप्तगालसमाधिकाः मत्तविंशाइमात्राः विंशतिः सप्तविंशतिर्मात्राः इत्य र्थः पततीतिशेषः छट्ठुमगणषष्ठोगणः मेरुवजुअलाइमेरोःयुगलंमेरुर्लघुस्तद्युगलमि त्यर्थः पूर्वार्द्धेउत्तरार्द्धेचप्रत्येकंगुर्वंताः सप्तगणाः स्थाप्यास्तत्रषष्ठस्थानेएकोलघ्वात्मकोग णः स्थाप्यः अन्यत्रचतुर्मात्रकइत्यर्थः एवंचषण्णांचतुर्मात्रकगणानांचतुर्विंशतिर्मात्राःए काचमात्राषष्ठस्थानस्यलघोर्मात्राद्वयंचांतस्थगुरोरेवंयत्रसप्तविंशतिर्मात्राः पूर्वार्द्धेउत्त रार्द्धेचप्रत्येकंपततितत्तगाढूनामछंदइतिनिगलितार्थः गाढूमुदाहरतिचंदोइति॥ चंद्र

चंदनंहारोमुक्तादामएतेतावत्तरूपंस्यकांतिंप्रकाशयतिचंडेश्वरवरकीर्त्तिः यावण्यावत्
अप्पंअप्पाणंसंनअंसेइननिर्देशयतिप्रकटयति॥५३॥अथगाथांलक्षयति।पढममि
ति।यत्रपढमंप्रथममाद्यचरणेइत्यर्थः बारहमत्ताद्वादशमात्राःपतंतीतिशेषःयाचबीएद्वि
तीयेचरणेइत्यर्थः अट्ठारहेहिंअष्टादशभिःमात्राभिरितिशेषःसंजुत्तासंयुक्ता।यस्याश्चज
हपढमंतहतीअंयथाप्रथमंतथातृतीयःचरणइतिशेषःद्वादशमात्रायुक्तइत्यर्थःपाच
चउत्थेचरणेइतिशेषःदहपंचविहसिआपंचदशभिर्मात्राभिरितिशेषःविभूषितासागा
हागाथानामकंछंदइत्यर्थः॥५४॥गाथामुदाहरति॥जेणेतियेनविणाणजिविज्जइयेन
विनानजीव्यतेसःकअवराहोविकृतापराधोपिअणुणिज्जइअनुनीयते।एनमेवार्थ
मर्थांतरन्यासेनद्रढयतिपत्तेवीति।पत्तेविप्राप्तेपिणअरडाहेनगरदाहेअग्गीअग्निःकस्स

णवल्लहोकस्यनवल्लभइतिभणवद् अपितुसर्वस्यापिवल्लभइत्यर्थः मानवंतीकांचिन्नायि
कांप्रतिसखीवाक्यमेतत् अयंचवक्ष्यमाणभेदेषु चूर्णीनामकोदशमोभेदइतिबोध्यं।५२।
अथगाथायांमात्रानियममुक्त्वागणनियममाह सत्तेतिगाहेगाथायांसत्तगणादीहंतास
मगणाःदीर्घांताः दीर्घोगुरुस्तदंताः भवंतिअत्रविशेषपरोपिदीर्घशब्दः सामान्यगुरुप
रोज्ञेयः एवंचएवोर्ढ्वंउत्तराद्धौंउत्तराद्धेचगुर्वंताश्चतुर्मात्रिकाःसप्तगणाःकर्त्तव्याः इत्यर्थः
इहइत्ययेतनस्यानुषंकेः इहगाथायांछठ्ठुषष्ठःगणः जोणलहूजोजगणः गुरुमध्यःन
लहूलघुयुक्तोनगणोवाभवति। कर्त्तव्येषुगुर्वंतसप्तगणेषुषष्ठोजगणश्चतुर्लघुकोन
गणोवागणोदेयइत्यर्थः णेहजोविसमेइहगाथायांविषमेतृतीयपंचमेसप्तमेचस्था
नेइत्यर्थः जोजगणोगुरुमध्योनपततीत्यर्थः। तहतथाविअत्रद्वितीयार्द्धेछठ्ठुलहुअ

विश्रामे तु षष्ठं गणं लघुकं एकलघुरूपं विजानीत एवं च पूर्वं नलघुजगणयोरन्यतर
दानं पूर्वोक्ताभिप्रायेणेति प्रतीयते तथा च मध्यलघुर्जगणः लघुसंयुक्तो नगणस्त्रिलघ्वा
त्मको वा नगणः पूर्वार्द्धे षष्ठे विधेयः उत्तरार्द्धे च एकलघ्वात्मक एव षष्ठो गणो विधेय इति
भावः ॥ ५६ ॥ अथ गाथाया वस्यमापाकड्डुङ्कि शति विधायां समुदितमात्रानियममाह । स
त्ताएइ तिपुव्वधम्मि अत्तीसीए वोद्दे त्रिंशत्परधम्मि पराद्धे उत्तरार्द्धे इत्यर्थः सत्ताईसा स
मविंशतिः एवं प्रकारेण सत्ताए गाहाए रासवस्या गाथायां सत्तावस्साइ सप्तपंचाशन्मत्ता
ई मात्रास्युरिति भवंतीत्यर्थः पूर्वार्द्धे षष्ठे चतुर्मात्रकस्य जगणस्य लघुयुक्तनगणस्य वादाना
त्त्रिंशन्मात्रा पतंति उत्तरार्द्धे च षष्ठस्थाने एकलघ्वात्मकस्यैव गणस्य दानात्तद्रूपे सस्या एम०
मात्रात्रयं न्यूनं भवतीति सप्तविंशतिर्मात्राः पतंतीत्यर्थः ॥ ५७ ॥ अथानुपदमेव वक्ष्य ४७

माणेषु भेदेषु प्रथमं भेदं लक्ष्मीनामकं लक्षयति सत्ताइसेति॥ जस्सम्मियस्सांसत्ताशला
घ्याः सत्ताईसाहाराम सप्तविंशतिदीर्घाः गुरव इत्यर्थः तिसिरेहाइं तिस्तोरे खालघव इत्यर्थ
ः पतंतीति शेषः सागाहाणगाथानां मध्ये आद्या आद्या प्रथमेति यावत् तिसक्खराङ्त्रिंश
दक्षरा लच्छी लक्ष्मीः गाहा गाथा सा लक्ष्मीनाम्नी गाथेत्यर्थः अयमर्थः पूर्वं गाथायाः प्रथम
चरणे द्वादशमात्रादानमुक्तं तासां च षड्गुरवो भवंतीति द्वितीयचरणे अष्टादशमात्रादानमु
क्तं तत्र षष्ठस्थानपतितजगणाद्युतस्य लघुद्वयवर्जनात्तासामष्टौ गुरवो भवंतीति पूर्वार्द्धे
चतुर्दश गुरवः एवं तृतीयेपि चरणे द्वादशमात्रादानस्योक्तत्वात्तासां षड्गुरवः चतुर्थे च पंच
दशमात्रादानस्योक्तत्वात्तत्र षष्ठस्थानपतिते कलैकात्मकगणवर्जनात्तासां सप्तगुरवः
इति उत्तरार्द्धे त्रयोदशगुरवः एवं पूर्वार्द्धोत्तरार्द्धयोस्संमेलने सप्तविंशतिगुरवः पूर्वार्द्धे ज

जगणाद्यंतस्थौ द्वौ लघू उराई च षष्टस्यैको लघुरेवं त्रयो लघवश्चेति त्रिंशदक्षराणि यत्र पतं
ति सा लक्ष्मीनाम्नी गाथेत्यर्थः॥५८॥ अथ लक्ष्मीनाम्नीगाथां स्तौति॥ ति सेति। विस्ताश्चावि
ख्याता· हासशाङ्गसति वं कं वं क्रं। गुरुहरित्यर्थः एकैकस्य गुरोर्ह्रासे लघुद्वयवृद्धिर्बोधव्याः अन्य
था सप्तपंचाशन्मात्राणां नैयत्यं न स्यात्॥ तासां करोति नामानि॥ एकैकगुरोर्ह्रासे लघुद्वयस्य
च वृद्धौ ये भेदास्तेषां नामानि करोतीत्यर्थः। लक्ष्मी॥५९॥ लक्ष्मीति क्रमाद्गुरोर्ह्रासेनरूपाणां।
स्वमत्र्यासमादेही· देवी· राई रात्रिः। चुस्मा चूर्णा महामारी॥ ६०॥ मनोरमा· विश्वावासिता:।
शोभा तेन षड्विंशतिर्नामानि· भेदानाम्॥ पितावन्मात्रेत्वात्· तथा हि सप्तविंशतिरेव गाहायां गु
रवो न त्वधिकाः। तत्रांतिमो नियतो एवं चावशिष्टपंचविंशतिगुरूणां भिद्यमानानां पंचविंशति एम°
भेदाः एकश्च सर्वगुरुक इति षड्विंशतिरेव भेदाः एतेन पादांत्यस्य मात्रापूरणनिर्वाहाय गुरु ४८

त्वापादनेपि च तु गस्य लघुत्वादष्टाविंशतिभेदाः इत्यभिसंधायमानिनीरामाविश्वावुसिते
तिअष्टाविंशतिनामानि वदंतः परास्ताः॥ ६१॥ अत्र प्रथमं जगणमेवावलंब्य ततो द्वितीया
दयश्चतुर्विंशतिर्भेदाः षष्ठे जगणनलघ्वात्मकगणान्यतरदानमवलंब्य बोध्याः अस्य तु ष
ष्ठेन लघुमेवावलंब्येति हृदयमयनुमाणीरामेति नामद्वयं विधाय एक गुरु पंचपंचाशल्लघ्वा
त्मकः सप्तविंशतितमोपि भेदः कैश्चित्स्वीकृतस्तदनवधानात तथाहि यदि षष्ठे जगणो दी
यते तदा जगणमध्यस्थ एको गुरुर्दलद्वयांतस्थं च गुरुद्वयमावश्यकमिति एकोपि गुरुर्न
संभवत्येवा यदि षष्ठे चलघ्वात्मको गणो दीयते तदापि दलद्वयांतस्थगुरुद्वयस्यावश्यकत्वा
देको गुरुर्न संभवत्येवेति षड्विंशतिरेव भेदा न सप्तविंशतिरिति सुधीभिर्विभावनीयम्॥ यद
पि मानीरामेति एकं नाम विधाय गाहिनीति नामलेखकप्रमादोत्यतितमिति तस्या द्यो

स्त्रिगुर्वेकपंचाशल्लक्षात्मकास्याः पंचविंशतिरेवभेदानामानिचाषड्विंशतिरिति॥ तदप्युन
वधाननिबंधनंयतषष्ठेनलघुरूपगणदानेनांत्येचावश्यकगुरुद्वयदानेननिशबाधंसंभ
वतोद्विगुरुत्रिपंचाशल्लक्षात्मकस्यषड्विंशतितमस्यभेदस्यत्यागानौचित्यमावहतीत्यल
मतिविस्तरेणेत्यसमस्तातचरणोपदिष्टः पंथाः सुधीभिर्विभावनीयः॥ अथगाथापठ्यत
इतिशेषः सर्वत्रयोज्यः पठनप्रकारमाहपठममिति। अत्रचीशब्दस्त्वर्थः तथाचपठमंचीप्र
थमंतुगाहागाथादहसपअंदहसपदंजाआययामंथरामित्यर्थः तथापठ्यत इतिशेषः सर्वत्रयो
ज्यः वीराद्वितीयेचरणेसिंहस्सविक्कमंसिंहस्यविक्रमोयथातीरात्तृतीयेचरणेगअवरलुलि
अंगजवरलुलितंगजेंद्रगमनमित्यर्थः यथाचउत्थराचतुर्थेचरणेअहिवलुलिअंअहिलु रम०
लितंसर्पगतिविशेषइतियावत्तयथा॥ ६२॥ अथसमस्यानेपिजगणदानेगाथायांगु ४९

णदोषाबाहए एक्के जे इति। एक्के जे कुलवंती एकस्मिन् जगणे सति कुलवंती होइ भवति गा
थेति शेषः यथोक्तषष्ठस्थानस्य जगणमात्रेण समीचीना गाथा भवतीति तदतिरिक्तो जगण
समस्थानेपि न कर्त्तव्य इति भावः वेणात्र द्वेति द्वि नायकाभ्यां जगणाभ्यामिति यावत् संग
हिणी भवतीति एवं वेणान्वयः यथाद्वाभ्यां नायकाभ्यां परस्य रंगरहिता कामिनी न सतां संमता
तथेयमपीति जगणद्वयमत्र न देयमिति भावः णात्र क्करहीना रंडो नायकेण जगणेन रहीना
रहिता षष्ठे स्थानेन लघुयुक्तेत्यर्थः रंडे व रंडेत्यर्थः तथा च यथा नायकेन रहीना कामिनी न शो
भते तथेयमपीति बहुधा षष्ठो जगण एव देय इति भावः बहुणात्र ह्का बहूनायका बहवो
नायका जगणा यस्यां सा तादृशीत्यर्थः वे होइ भवति तथा च यथा वेश्यास्तनामनादरणी
या तथेयमपीति बहवो जगणा न देया इति भावः॥ ६३॥ अथ वर्णभेदेन गाथाया जातिभेद

पिं॰ग॰सु॰टी॰मा॰ हुते रह इति। तेरह लहुआ त्रयोदश लघुका सरा ख्या गाथेत्यर्थः सर्वत्र योज्यं विप्पी विप्रा भ
५० वतीति शेषः एआईसे इगि एकचत्वारिंशद्भिरेकविंशद्भिर्वेत्यर्थः लघुभिरिति शेषः षत्तिणि
क्षत्रिया भणिता। सत्ताइसे सप्तविंशतिभिर्लघुभिर्वेसी वैश्या भणितेति सर्वेणान्वयः सेसा शे
50 षा अनुक्तलघुसंख्याका सुद्दिणि होइ शूद्रा भवतीत्यर्थः॥ ६४॥ अथ विषमस्थानस्थजगणदो
षमाह। जाइ ति जा पठमतीअपंचमसत्तमठाणे या प्रथमे तृतीये पंचमे सप्तमे च स्थाने ण णनु
निश्चयेनेति यावत् गुरुज्झा गुरुमध्या गुरुमध्यो जगणस्तद्युक्तेति यावत् होइ भवति सा गाहा
गाथा गुणरहिता गुव्विणि एगुर्विणीव दोषं प्रकाशयति तथा च विषमे गाथायां जगणो न देय
इति भावः। ६५॥ अथ विगाथां लक्षयति विगाहेति विगाहा पठमदले विगाथा प्रथमदले ए ए॰म॰
वार्द्धं इति यावत्॥ सत्ताइसाइं मत्ताइं सप्तविंशति मात्राः भवंतीति शेषः पच्छिमदले पश्चि ५०

मदले उत्तरार्द्धे इत्यर्थः णनु नु निश्चयेनेत्यर्थः त्रिंशन्मात्रा भवंतीति पूर्वेणान्वयः इम
एवं पिंगलेन नागेन जंपितं जल्पितं अयं भावः एवं विपरीतगाथा विगाथा भवतीत्युक्तं तथा च गा
थाया उत्तरार्द्धं पूर्वं पूर्वार्द्धं अग्रे देयं इत्युक्तं भवति अत एव पूर्वार्द्धे सप्तविंशतिर्मात्रा उत्तरार्द्धे च
त्रिंशन्मात्रा उक्ताः एवं चात्रापि पूर्वार्द्धे षष्ठो गण एकलघ्वात्मको देयः उत्तरार्द्धे च षष्ठो गणो ज
गणात्मको वा देयः विषमे च जगणो न देय एवेति सुधीभिर्बोध्यं ॥ ६६ ॥ अथ विगाथामुदाह
रति परिहरेति। पीवरस्तनियस्य कदंबस्य कुसुमानि पश्य रहितप्रेमस्वकिंतावते तस्य तत्राप्यदत्तुस्व क
रा इति। खरहृदि अओ कठिनहृदयो निर्दय इति यावत् कामो कामः धण्णं हि धनधिगुडिआ गुटि
कायद्वा गुडिआ धनं हि इत्येकं पदं तस्य च गुटिकाधनः गुटिकायुक्तं धनरित्यर्थः गुले लइ इति लो
के गेहइ इगट स्फाति अतो मानपरिहरेत्यर्थः ॥ ६७ ॥ उद्गाथां लक्षयति। पव्वद्धे इति यत्र पव्वद्धे

उत्तद्धे पुर्वार्द्धे उत्तरार्द्धे मत्ताति सत्तिमात्रास्त्रिंशत संभणि आसं भणिताः हे शुभ शिष्य सोत
त पिंगलक इदितु पिंगलकविनादृष्टं सद्धिमेत्तं गोषष्टिमात्रां गं षष्टिमात्रात्मकशरीरमित्य
र्थः उगाहो वुत्तो उग्दाथा दृत्तं। गाथापूर्वार्द्धे दलद्वयेपि देयमिति भावः॥ ६८॥ उज्जाथामु
दाहरति सोह्रुणोति हे सुमुहि सुमुखि जस्सणामं यस्य नाम सोकणसुला अणिकत्तंभेता
निपा अणाइं नयने कुमेर्णी हिंथे इरु धति अतसास्य च इव इणो चेदियते। मुहंमुखं जहिछ
से यथेछं कक्कहं कथये त्सवामिपश्यामि इति त्वं भण कथय॥ ६९॥